॥स.जी.च० ॥श्रीसहजानंदस्वामिने नमः॥ अथ चतुर्थप्रकरणं प्रारभ्यते॥ सूत उवाच॥ स्वगृहे निवसंतं तं निर्द- च०१॥
॥२॥ भोऽभयपनंदनः॥ सिषिवे परया भक्त्या सकुटुंबोऽत्र हेतुप॥१॥ तत्रोत्तमो सहकृतवानन्नकूटमहोत्सवम्
॥प्रबोधन्युत्सवं चापि पूर्ववद्भिस्मपावहम्॥२॥ भक्तैः सपरिवारैस्तं सुखयन्भगवानपि॥ भक्ता देशांतरे-
भ्यः स्वानादायाग्रीकरत्नुतौ॥३॥ प्रबोधन्युत्सवेऽतीते स्वस्वदेशांगतेषु च॥ देशांतरीयजीवेषु भगवा-
न्यो कृपावृतः॥४॥ विदीक्ष्यांस्थापयन्नेवमर्यादां साधुवित्तेषु मः॥ पुराणश्रवणारंभमचिकीर्षच्च सर्ववि-
त॥५॥ उषस्युत्थाय शौचं च प्रातःकृत्यं विधाय सः॥ आकारयत्सु राणं तं मयारामजितमीश्वरः॥६॥ स मंदि-
रे बहिर्वेद्यामासने सत्पावित्रात्त॥ तत्र पौराणिकश्चान्ये पार्षदाद्यावपापयुः॥७॥ पयोनिवितं सभायां ते
निषेदुस्त्वथयावस्थया॥ ततः स भगवानूचे मयाराम द्विजं प्रति॥८॥ श्रीनारायणमुनिरुवाच॥ शृणु त्वं ब्रा-
ह्मणश्रेष्ठ ज्योतिःशास्त्रविशारदः॥ मासोऽयं मार्गशीर्षोऽस्ति मासानामुत्तमः किल॥९॥ विभूतिर्वा स्कंदे
व्यासकथितोऽसौ महर्षिभिः॥ पुराणश्रवणं कर्तुमत्रेवास्मिन्मतिर्द्विज॥१०॥ तदारंभमुहूर्तं त्वं यथाशा-
स्त्रं वदाऽधुना॥ निरंतरायसिद्धिः स्यात्तदारंभे कृते सति॥११॥ पंचांगं पत्रं निष्कास्य सतदाप्युलवेक्ष्य ना-
त॥ इत्थाच हरिस्वामिन्मुहूर्तं श्रेष्ठोऽस्ति तावद्याम्॥१२॥ योगोऽस्ति मित्रसंज्ञो यद्दिनेशबुधवारयोः॥ पुरा- ॥१॥

णश्रवणारंभस्तत्र कार्यस्त्वया प्रभो॥१३॥ इत्युक्ते तेन भगवान्प्राह पौराणिकं वचः॥ आरंभः श्वोऽस्ति
कर्तव्यः श्रीमद्भागवतस्य मे॥१४॥ उषस्युत्थाय कर्तव्यं दिनाद्युप्रहराविधि॥ त्वया स्वामिश्च विप्रर्षे नै-
त्यकं कर्म चाऽन्वहम्॥१५॥ ततः कथायाः प्रारंभं कृत्वा मध्याह्न एव सा॥ समापनीया च ततः कार्यो
माध्याह्निको विधिः॥१६॥ पुनस्तृतीयायामांते सायं संध्यावधिर्द्विज॥ प्रारभ्य च समापासा भावतो रु-
चिरस्ति चेत्॥१७॥ पौराणिक उवाच॥ एवमेव करिष्यामि कृपानाथाहमन्वहम्॥ वाचयिष्ये यथाका-
लं कथामत्र दृढासनः॥१८॥ विश्रांतिर्याकृतामध्ये त्वमास्वामिंस्तयामम जातं मम च प्रसन्नं वै देह ऊर्जो
ऽस्य यावेत्॥१९॥ आगम्यतां श्वः रसुक्ता न तस्तं भगवान्निजान्॥ भक्तान्पुराणश्रोतृंश्च जगादानेदय-
न्नवचः॥२०॥ श्रीनारायणमुनिरुवाच॥ भक्ताः शृणुत भद्रं वः सर्वे यां हितमुच्यते॥ पुराणश्रवणं का-
र्यमस्मैरेवमदाश्रितैः॥२१॥ चतुर्णामपि वर्णानां तथैवाश्रमिणामपि॥ अधिकारोऽस्ति वस्तैव पुराणश्र-
वणे सदा॥२२॥ एष साधारणः पंथाः साक्षाज्जर्वापसिद्धिदः॥ महामुनिजनैः प्रोक्तो देवैरपि सुपूजितः
॥२३॥ स्वरूपबोधो न हरेः कथायाः श्रवणं विना॥ भवेन्नृणां विना तं च कथं स्यात्संसृतिक्षयः॥२४॥ तस्मा-
द्यासकृता नां हि पुराणानां निरंतरम्॥ श्रवणं भारतस्यापि कार्यं रामायणस्य च॥२५॥ अज्ञानतिमिरा

॥स॰जी॰च॰ धानां दीपोयं ज्ञानसिद्धिदः ॥ पुराणश्रवणं नित्यं सो रोषधं नव रोगिणाम् ॥२६॥ सर्वस्यैवात्मनः श्रेयो ये- श्र॰१॥
॥२॥ भिवांछंति दिने दिनेः ॥ तः श्रृण्वंतु सदा भक्त्या कथां पौराणिकीं शुभाम् ॥२७॥ अशक्तो यः सदा श्रोतुं कथां
भगवतः सतु ॥ मुहूर्त्तं वापि शृणुयान्नियतात्मा दिने दिने ॥२८॥ यस्तु प्रतिदिनं श्रोतुमशक्तः सोऽपि मान-
वः ॥ पुण्यमासे पु शृणुयात्पुण्यासु च तिथिष्वपि ॥२९॥ मुहूर्त्तं वा तदर्द्धं वा क्षणं वा यावनीं कथाम् ॥ ये शृण्वं-
ति नरा भक्त्या न तेषामस्ति दुर्गतिः ॥३०॥ यत्फलं सर्वयज्ञेषु सर्वदानेषु यत्फलम् ॥ भक्त्या पुराणश्रवणात
त्फलं विदंते नरः ॥३१॥ कलौ युगे विशेषेण पुराणश्रवणादृते ॥ नास्ति धर्मः परः पुंसां नास्ति मोक्षपथः
परः ॥३२॥ कलौ हीनायुषो मर्त्त्यो दुर्बलाः श्रमपीडिताः ॥ दुर्मेधसो दुखभाजो धर्माचारविवर्ज्जिताः ॥३३॥
रति संचिंत्य कृपया भगवान्बादरायणः ॥ हिताय तेषा विदधे पुराणाख्यं रसायनम् ॥३४॥ पिबन्नेवामृ-
तं यस्मादेकः स्यादजरामरः ॥ पुराणामृतपः कुर्यात्कुलमप्यजरामरम् ॥३५॥ विना पुराणश्रवणं नरः
पशुसमो मतः ॥ तस्मादवश्यं तत्कार्यं विधिना स्वहितार्थिभिः ॥३६॥ सूत उवाच ॥ इत्युक्तवंतं तं नत्वा हरि-
मुत्तमभूपतिः ॥ पप्रच्छ प्रांजलिर्भक्त्या पुराणश्रवणोत्सुकः ॥३७॥ राजोवाच ॥ पुराणश्रवणस्येश श्रोतु-
मिच्छाम्यहं विधिम् ॥ कस्मिन्काले च तत्कार्यं देशे कीदृग्विधेन या ॥३८॥ वक्ता पुराणस्य विभो कीदृशः ॥२॥

परिकीर्त्तितः ॥ श्रोतारः कीदृशाश्चास्युः किं देयं तैः समापते ॥३९॥ एतन्मे ब्रूहि भगवन्निति पृष्टो नृपेण
सः ॥ सर्वेषां श्रृण्वतां मूचे तच्छुश्रूषोर्विदन्विभुः ॥४०॥ श्रीनारायणमुनिरुवाच ॥ सर्वपापविनिर्मु-
क्तिकरणीयस्य समानसम् ॥ नवेनेनादरान्नित्यं पुराणं श्रवणमुत्तमम् ॥४१॥ आनुकूल्यं न चेन्नित्यं तदावश्यं
पुमान्नृप ॥ पुराणश्रवणं कुर्यात्त्रीनुमासेषु पर्वसु ॥४२॥ विधानं तस्य यशजन्मं योक्तफलदायकम् ॥
तत्कीदृशादि पुराणोक्तं कथयामि समासतः ॥४३॥ कृताह्निकः समाहूय वक्तारं शास्त्रकोविदम् ॥ सेनाधा-
सनदानेन नमस्कुर्यात्तमादरात् ॥४४॥ उच्चासने पुस्तकं च संस्थाप्यैव ततो वरे ॥ व्यासासनेऽतिमृदुले वक्ता-
रमुपवेशयेत् ॥४५॥ संपूज्य पुस्तकं त्वादौ ततो वक्तारमर्चयेत् ॥ चंदनेनाक्षतैः पौष्पैर्हारोरैर्धूपदीपकैः ॥४६
॥ नैवेद्य फलतांबूलदक्षिणाभिश्च भक्तितः ॥ संपूज्य रात्रिकं कृत्वा नमस्कुर्वीत सादरम् ॥४७॥ नमस्ते भ-
गवन्व्यास वेदशास्त्रार्थकोविद ॥ ब्रह्मविष्णुमहेशानां मूर्त्ते सत्यवतीसुत ॥४८॥ मंत्रेणानेन वक्तारं नमस्कृ-
त्य ततो नृप ॥ श्रोतृन्निशान्स तत्रार्च्यं न्मुख्यैः श्रोता यथोचितम् ॥४९॥ आसनादुद्वरे वस्त्ररूपा विरूपासने
ततः ॥ पुराणं शृणुयात्पुंसैर्वैनत्वातं स्वस्थमानसाः ॥५०॥ उपवेश्य पंश्यासनानां पृष्टतस्तत्र वाग्रुजैः ॥ तेषां च पृष्ट-
तो वेश्यैस्तेषां शूद्रैस्तु संसदि ॥५१॥ प्रेष्य संकरजातीयाः स्त्रुजाणां पृष्टतस्तु तैः ॥ मर्यादयैवोपविश्य श्रोत-

॥स॰जी॰च०॥ ॥ ३ ॥

आभगवत्कथाः ॥५२॥ ज्ञानवृद्धांस्तपोवृद्धान्ब्रह्मनिष्ठांश्च ये द्विजाः ॥ उपवेश्याथ श्रोतृभिस्ते सर्वे धामन्यतो अ०१॥
मरैः ॥५३॥ धनुर्मानांतरे तेभ्यः स्त्रीभिश्चापि महीपते ॥ मर्यादयैवोपवेश्यं तत्र श्रोतुं हरेः कथाः ॥५४॥ पत्रं
पुष्पं फलं वापि रौप्यं कं ताम्रं हस्तकम् ॥ निवेद्य वाचकायाथ भुक्तिं वा कर्तुं शृणुयात्कथाम् ॥५५॥ आज्यो युवा च
वा वृद्धो दरिद्रो दुर्बलोऽपि वा ॥ पुराणज्ञः सदा वंद्यः पूज्यश्च सुकृतार्थिभिः ॥५६॥ नत्वाकृतमतिः कार्या पुरा
णज्ञे कदाचन ॥ यस्य वक्त्रोद्गता वाणी कामधेनुः शरीरिणाम् ॥५७॥ गुरवः संति लोकस्य जन्मतो गुणत
श्च ये ॥ तेषामपि च सर्वेषां पुराणज्ञः परो गुरुः ॥५८॥ भवकोटिसहस्रेषु भूत्वा वसीदते ॥ यो ददाति हरेर्ज्ञा
नं कोऽन्यस्तस्मात्परो गुरुः ॥५९॥ पुराणज्ञः शुचिर्दांतः शांतो विजितमत्सरः ॥ साधुः कारुण्यवान्वाग्मी
ज्ञात्वा विप्रः कथां वदेत् ॥६०॥ द्विजातिरन्यो यः प्राप्तो दीक्षां भागवतीं सतु ॥ असंगब्रह्मचर्यस्थो निर्लोभ
श्च वदेत्कथाम् ॥६१॥ व्यासासनं समारूढो यदा पौराणिको भवेत् ॥ आसमाप्तेस्तदा कंचिन्नमस्कुर्यान्न भू
पते ॥६२॥ एकांतिका हरेर्भक्ता हरिर्वामानुपाकृतिः ॥ तत्रागच्छेद्यदि तदा नमस्कुर्वीत तांश्च तम् ॥६३॥ ये धू
र्ता ये च दुष्टा नापि चान्ये विजिगीषवः ॥ तेषां कुटिलवृत्तीनामग्रे नैव वदेत्कथाम् ॥६४॥ न दुर्जनसमाकी
र्णे न शूद्रश्वापदाकुले ॥ देशे न द्यूतसदने वदेत्पुण्यकथां सुधीः ॥६५॥ सद्ग्रामे सद्भिराकीर्णे सुक्षेत्रे देवता ॥ ३ ॥

नदीतटेषु चौगेहे कथा वाच्या शुभाजये ॥६६॥ प्रधानकिंसमायुक्ता नान्यकार्ये पुजोजसा ॥ वाध्यतां श्रु
चयो व्यग्राः श्रोतारः पुण्यभागिनः ॥६७॥ पुराणं येत्व संपूज्य गंधाद्यैर्नमनेन वा ॥ शृण्वंति च कथां भक्त्या
दरिद्राः स्युर्न रास्तु ते ॥६८॥ कथायां कीर्त्यमानायां येगंतुं त्वन्यतो नराः ॥ भोगकाले प्रणश्यंति तेषां दारा
श्च संपदः ॥६९॥ सोष्णीषैर्ये न कथा श्रव्या पूगतांबूलभक्षणम् ॥ श्रोतृभिर्नैव कर्तव्यं नतमाजादिसेवन
म् ॥७०॥ तुंगासने नोपवेश्यं नच वक्त्रसमासने ॥ प्रौढपादैर्नोपवेश्यं नैव वीरासनेन च ॥७१॥ वस्त्रवेष्टितपा
देश्च नोपवेश्यं तथा क्वचित् ॥ नात्रापानैः कथा श्राव्या देहिका पदमंतरा ॥७२॥ स्त्रीणां मुखाभिमुख्यं नो ये श्रु
ण्वंति कथा हरेः ॥ कामिनस्ते नु पुरुषा भवंति ग्राममर्कटाः ॥७३॥ कथायां वर्त्तमानायामन्यावाचो वदंति
ये ॥ ते गर्दभाः प्रजायंते तथा वादपरा ग्रहेः ॥७४॥ कथायां श्रूयमाणायां विघ्नं कुर्वंति ये शठाः ॥ पिशाच
त्वं प्रपद्यंते ते स्युर्नृपसत्तम ॥७५॥ ये निंदंति पुराणज्ञान्कथां वा पापनाशिनीम् ॥ ते तु जन्मशतं मर्त्याः शु
नकाः संभवंति हि ॥७६॥ तस्माद्रूपविनयं राजन्सादरेण हरेः कथा ॥ श्रोतव्या नियमेनैव यथा वक्तुः सुखं
तथा ॥७७॥ नैवेन गात्रं संमर्द्य स्नात्वा नतः पुराणवित् ॥ अन्यैः स्मृतैः सरसैर्भोजनं यस्तथा स्वगृहम् ॥७८॥
देयं तस्मै च पूर्वाह्ने उत्सहं स्वरशुद्धये ॥ सशर्करं तु गोक्षीरं गाढितं वा पिबेत्तथा ॥७९॥ खंडपूर्वसंकधप्र

॥स॰जी॰च॰ तौं व्रतार्हेषु च पर्वसु ॥ विधिवत्पूजा कर्तव्या देयाशक्त्या च दक्षिणा ॥ ८० ॥ समाप्तौ तु पुराणस्य कर्तव्यं भू॥ च॰१॥
॥ ४ ॥ जनं महत् ॥ यथाशक्त्याखिलैर्देयाश्रोतृभिर्हेमदक्षिणा ॥ ८१ ॥ गौर्धेनुर्वाला मुशीला वस्त्रं वाःनेव वाह
नम् ॥ काश्चंदरिद्रोपि मूर्दं तस्मै दद्यात्स्वशक्तितः ॥ ८२ ॥ आरोप्य वाहने रम्यं वस्त्रालंकारपूजितम् ॥ गीत
वादित्रैर्नयेयुस्तं श्रोतारस्तद्गृहं ततः ॥ ८३ ॥ इति सामान्यतः प्रोक्तः सर्वेषामेव भूपते ॥ पुराणोपपुराणानां
श्रवणस्य विधिर्मया ॥ ८४ ॥ विधिनानेन शृण्वन्तु ये पुराणानि भूपते ॥ संपूर्णास्याफलं तेषां पुराणोक्तं
न संशय ॥ ८५ ॥ आदौ विधिमिमं श्रुत्वा पुराणश्रवणं ततः ॥ कर्तव्यं विधिनानेन ततः सिध्यति वांछित
म् ॥ ८६ ॥ श्रीमद्भागवतं नाम पुराणं यन्महन्नृप ॥ अस्ति तस्य तु सर्वेभ्यो विशेषोऽप्यस्ति कश्चन ॥ ८७ ॥ वि
धिनाश्रवणं तस्य पुरस्य यत्रांकितः ॥ तं न वा येऽत्र कुर्वन्ति तेषां मुक्तमक्षयम् ॥ ८८ ॥ ऋतव्रत उवा
च ॥ आश्रुत्य नारायणवाचमित्थं विशुद्धबुद्धिः स पुनर्नरेशः ॥ जिज्ञासितं स्वस्य हृदिस्थमीशं पप्रच्छ नं
त्वां विनयेन राजन्नम् ॥ ८९ ॥ इति श्री सज्जीवने नारायणचरित्रे धर्मशास्त्रे चतुर्थप्रकरणे पुरा
णश्रवणे सर्वसामान्यधर्मतः सकलपुराणोपपुराणश्रवणविधिनिरूपणनामा त्रयमोऽध्यायः ॥
॥ १ ॥ राजोवाच ॥ श्रीमद्भागवतस्यापि श्रवणस्य विधिं प्रभो ॥ पुरस्य यं प्रकारं च विधिं दानस्य मे वद ॥ १ ॥ ४ ॥

यस्मै चैतद्यथा वर्द्धेतेऽखिसर्वमशेषतः ॥ अतः शुश्रूषवे मह्यं वक्तुमर्हसि तत्त्वतः ॥ २ ॥ ऋतव्रत उवाच ॥
इति भूपतिना पृष्टः स पुराणमुनिस्तदा ॥ श्रीमद्भागवतस्योचे श्रवणादिविधिं च तम् ॥ ३ ॥ श्री नाराय
णमुनिरुवाच ॥ शृणु राजन्प्रवक्ष्यामि श्रीमद्भागवतस्य ते ॥ श्रवणादिविधिं सम्यक्सर्ववांछितफ
लप्रदम् ॥ ४ ॥ पुराणानि द्विधा संति लघूनि च महांति च ॥ लघूनि तूपपुराणानि पुराणानि महांति च ॥ ५ ॥
महापुराणान्यकरोत्स्वयं व्यासो द्विजोऽस्य च ॥ अन्ये तूपपुराणानि चक्रुस्तावंति चर्षयः ॥ ६ ॥ ब्राह्मं पाद्म
वैष्णवं चैव शैवं भागवतं तथा ॥ मार्कंडेयं नारदीयमाग्नेयं च भविष्यकम् ॥ ७ ॥ लैंगं ब्रह्मवैवर्तं वाराहं
स्कांदं वामने ॥ कौर्मं मात्स्यं गारुडं च ब्रह्मांडं चापि भूपते ॥ ८ ॥ महापुराणसंज्ञानि प्रोक्तान्यष्टादशेति
हि ॥ नामान्युपपुराणानां कथयाम्यथ तेऽनघ ॥ ९ ॥ सानत्कुमारं नारदं च नारसिंहं च कापिलम् ॥ दौर्वा
ससं सारदीयं शैवधर्मं च मानवम् ॥ १० ॥ ब्रह्मांडाख्यं तथौशनसं वारुणं कालिकाह्वयम् ॥ वाशिष्ठलैंगं
वासिष्ठं तथा माहेश्वराभिधम् ॥ ११ ॥ पाराशरं सांबसौरे ह्येवाष्टादश भूपते ॥ मारीचं भार्गवादीनि संत
ह्यन्यान्यपिकानि चित ॥ १२ ॥ इतिहासस्त्विति प्रोक्तं यन्महाभारतं तु तत् ॥ रामायणं तु काव्याख्यं कथितं मु
निसत्तमैः ॥ १३ ॥ एतेभ्यश्च सवेदानां सारो भागवताभिधम् ॥ महापुराणं कथितं भवरोगरसायनं ॥

॥स॰ जी॰ च॰ म्॥२४॥नदीनां तु यथा गंगा देवानामच्युतो यथा॥वैष्णवानां यथा शंभुः पुराणानामिदं तथा॥२५॥ भा॰०२॥
॥५॥ सर्ववेदपुराणेभ्यः श्रेष्ठत्वेऽस्य तु कारणम्॥ कथयामि च ते राजन्नुचितस्त्वं श्रुतेर्यतः॥२६॥य
दाऽसृजज्जगदिदं ब्रह्मा लोकपितामहः॥तदानीं श्रेयसे नॄणां वेदं प्रावर्त्तयत्स तु॥२७॥एक एव पु
रा वेदः कृत्वा द्वापरयुगे॥अधीयते स्म सार्थं तं समग्रमपि संद्विजाः॥२८॥द्वापरांते त्वपधियो बभू
वुः कालवेगतः॥ते नाधीतुं नराः शेकुर्वेदं सुमर्थं च तस्य ते॥२९॥नारायणावतारोऽभूत्तदा द्वैपायनो
मुनि॥वेदार्थबोधने नैव श्रेयसे यततां सतानाम्॥३०॥वेदमेकं चतुर्द्धैव व्यभजत्स महामुनिः॥चक्रे वा
कृतदर्थं च पुराणोः सहभारतम्॥३१॥चतुर्णामपि वर्णानां माश्रमाणां च सर्वज्ञः॥धर्मार्थकाममोक्षां
श्च तत्र सोऽवर्णयत्स्फुटम्॥३२॥आत्यंतिकश्रेयसे च धर्मानेकांतिनामपि क्वचित्क्वचित्प्रसंगेन वर्ण
यामास तत्त्वतः॥३३॥ऋग्वेदाचार्यमकरोत्ततः पैलमृषिं मुनिः॥यजुर्वेदस्य चाचार्यं स वैशंपायनं मुनि
म्॥३४॥सामवेदस्याचार्यं च कार स तु जैमिनिम्॥अथर्ववेदस्याचार्यं च सुमंतुमकरोदृषिम्॥३५॥इति
हासपुराणानामाचार्यं रोमहर्षणम्॥स बादरायणस्तु के हिताय वेन नृणामृषिः॥३६॥सरस्वतीनदी
तीरे शम्याप्रासाभिधाश्रमे॥रस्यं कृत्वापि स मुनिर्नैवाऽसुष्यन्निजांतरे॥३७॥तस्याऽसंतोषहेतुं ते ब्रवीमि ॥५॥

नृपते शृणु॥निःश्रेयसमार्गलोकानां तस्य जन्माऽस्ति भूतले॥३८॥तस्य हेतुस्तु सद्धर्मो ज्ञानं वैराग्यमेव च
॥माहात्म्यज्ञानयुग्भक्तिर्नृणां श्रेतिचतुष्टयम्॥३९॥स तु तेनाऽस्य कीर्त्तेर्वर्णितो प्यऽतिविस्तृते॥
मिश्रवाद्धर्मकामार्थैर्बोद्धुं शक्यो न तत्त्वतः॥४०॥स्वर्गादिफलदर्शी च ततः कर्मसकामनाः॥सत्का
म्यासं च कुर्विधैर्वाक्यैस्तत्स्तुतिपादकैः॥४१॥तदा तु तस्य श्रेयोर्थो पुराणादिकृतिर्मुनेः॥ह्यासीद्विवाः
कृतमायानस्फलानुदयात्किल॥४२॥न दांतर्यामिणा साक्षाद्वासुदेवेन तत्कृति॥अपूर्णकाम तोत्रेरि
तयाता पीमहान्न भूत॥४३॥तदुक्त्या श्रवणाच्चास्य तान्नैसं कुचितं त्वऽभूत॥ततः शांतिं सनप्राप ग्रंथं क
र्त्तुं न चाऽशकत॥४४॥ततो दयालुर्भगवान्नारायणऋषीश्वरः॥नारदं प्रेषयत्तस्मै निपुणं परबोधने
॥४५॥विचारेणाऽपि ता यस्य हेतोरनुपलंभनात॥शोचंतं तं समुपेत्या य नारदः सर्वदुःखहा॥४६॥आसे
न पूजयित्वाऽयस्यासंतोषस्य कारणम्॥से पृष्टः स मुनिः प्रोचे सर्वतो भगवत्प्रियम्॥४७॥नारद उवाच॥
पदार्थमवतारस्ते सम्यक्कृतन्त्वयाकृतम्॥अपूर्णकामता तस्मात्हृदये तव वर्त्तते॥४८॥आत्यंतिकश्रे
यसे त्वं जनानां रचयाऽनघ॥स्वकृतं ग्रंथमर्वस्व पुराणकेवलं रसमम्॥४९॥पत्राः श्रीवासुदेवस्य तद्भ
क्तानां च तत्त्वतः॥तत्र वर्णयतः शांतिर्भविष्यति तवांतरे॥५०॥श्रीमद्भागवतं नाम पुराणं रचयाऽधु

॥स॰जी॰च॰॥ ॥६॥ ना॥ नेनकिःश्रेयसं नृणां लब्धं तेनोपपद्यते॥४१॥ आज्ञा नारायणस्यैवं भवतीस्तु पदिदृष्टपनाम्॥ अ॰३॥
तन्नाम नारदः सोऽपि यत्नवाधिगतसमाधिना॥४२॥ वेदान्स्मृतीश्चेतिहासान्पुराणानि च सर्वशः॥ सू
त्राणि काव्यानामानि बुध्यात सारमादरौ॥४३॥ स्वानुभूतिमहाये न तेन भागवताभिधम्॥ सचका
र महायोगी पुराणं मुक्तवांछितम्॥४४॥ क्षीराब्धावौषधीः सर्वा मथितामंदराद्रिणा॥ यथोदया
द्यद्धिममृतं पीयूषं सततं येवलन्॥४५॥ अंतर्हिते भूमिप वासुदेवे भुवस्तदा दायुःयएतदासीत्॥ सद्धा
न्वयस्वापिनिराश्रयस्य धर्मस्य लोके खलु पुराणमेव॥४६॥ इति श्री सत्संगिजीवने नारायणचरित्रे ध
र्मशास्त्रे चतुर्थप्रकरणे पुराणश्रवणे सर्वसंदेहच्छेदकभगवन्मतनिरूपणं नाम द्वितीयोऽध्यायः॥२॥
श्रीनारायणमुनिरुवाच॥ सारेऽस्मिन्सर्वशास्त्राणां श्रीमद्भागवताभिधे॥ सोऽस्य सूत्रोदितोऽस्य यो यो
गस्तूत्रोदितस्तया॥१॥ तत्र स्व सूत्रोदितस्था यो विदान्तार्थश्च भूपते॥ विस्तरो वर्णितोऽस्ति व्यासभगवद्भक्तिरुद
ये॥२॥ श्रीकृष्णोदितचतुर्व्यूहो वासुदेवादिसंज्ञकः॥ वर्णितः पंचरात्रेण पुरुषावतारवृत्त॥३॥ तस्य
स्वरूपविज्ञानं तस्मिन्भक्तिश्च नैष्ठिकी॥ नैष्कर्म्यं कर्मतत्त्वांशैर्वैराग्यमितरत्र च॥४॥ तथा तस्याऽवता
राणां जन्मकर्माणि यान्यपि॥ तेषां दिव्यतया ज्ञानं तद्भक्ते सेवमी रुदम्॥५॥ तथाऽस्मरूपविज्ञानं सम्यग्दृ- ॥६॥

नृणां भवेदिति॥ एतान्येवात्र विस्तार्य बहुधा वर्णयन्मुनिः॥६॥ एतं गुह्यतमं स्वर्थं श्रीमद्भागवतं स्वि
तम्॥ न हि सर्वे विजानंति मानं तिविरजा बुधाः॥७॥ श्रोतारो वापि वक्तारो ये स्वधर्मेषु संस्थिताः॥ पंचस्व
पि रक्षावेविषये वाल्मवेदिनः॥८॥ न शक्नुतिं वासुदेवमनंतैश्वर्यमंदिरम्॥ ज्ञात्वैव तत्र भक्तिं ये नैष्ठिकीं
कुर्वते नगः॥९॥ सौहार्दं मात्वते पूर्वं वनिर्दंभयेन कुर्वते॥ नारी वैतद्रहस्यज्ञानं तिन्नपनेतरे॥१०॥ एते तु ज
न्नतो युक्त्या अदक्षा अपि लौकिके॥ अनधीतानेकशास्त्रा अपेतच्छवेणादिदुः॥११॥ एतत्त्वज्ञातहीना
येऽधीतशास्त्रचया अपि॥ निपुणा व्यवहारेषु कुर्वंतो गुरुतामपि॥१२॥ यावज्जीवमधीयानाः स्पृणंवतोऽवं
तदृग्न्वहम्॥ रहस्यं नैव जानंति लभंते प्रेम न प्रभो॥१३॥ ज्ञात्वा वै तद्रहस्यं तावकान्ववर्तते तथाचये॥ तेऽप्य
ज्ञतुल्या विज्ञेया भक्त्यास्वेव्यमिदं त्वत॥१४॥ पुराणास्येदृशास्यास्य ज्ञानादज्ञानतोपि वा॥ श्रवणात्पव
नेवापि ये कुर्युर्मानवा भुवि॥१५॥ सद्यस्ते पापनिर्मुक्ता भवेयुर्यदि ते पुनः॥ न कुर्युः पातकं नहिं पुक्काःस्युर्न
वबंधनात्॥१६॥ चिरंतनायावृत्तायाम हापापमहारुजः॥ स्वल्कापानिकृते वैवं हीरिदमेवाऽमृतं हितम्॥
१७॥ रहस्यमेतत्परमं कृत्वा व्यासो निजात्मजम्॥ पुराणं श्रीयसे नृणां शुकं सत्वाध्यजीगपत्॥१८॥ दयालु
ः स शुकः प्राह गंगातीरे परीक्षितम्॥ प्रायोपविष्टं नृपतिं महर्षिगणसंसदि॥१९॥ ततः प्रवृत्तिरभवन्मृतले

भा·मा·च०

॥ ७ ॥

ऽस्मन्नराधिप॥ श्रीमद्भागवतस्येति श्रीमुखेन त्वत्कीर्तितम्॥ २०॥ आरभ्य निर्गमात्त्रिंशद्वर्षाण्यधिगते क- ग०७॥
लौ॥ नवमीतो नभस्ये च कथारंभं शुकोऽकरोत्॥ २१॥ समभिर्दिवसैः सर्वैर्मासार्थं चाऽत्र कथ्य अनन्त॥ श्री
कृष्णद्यौ पौर्णमास्यां पुराणं तन्महाप्यत्॥ २२॥ वेदादीनां साररूपा पत्ती भागवती कथा॥ अत्युत्तमात
लोभाति मे वर्नाग्रे च सर्वथा॥ २३॥ यथा दुग्धे स्थितं सर्पिर्नास्वादायोपकल्पते॥ पृथग्भूतं तु तद्दिव्यं देवा-
नां रसवर्द्धनम्॥ २४॥ इक्षूणामादिमध्यांते शर्करा व्याप्य तिष्ठति॥ पृथग्भूतैव सा मिष्टा तथा भागवती
कथा॥ २५॥ कालव्यालमुखग्रासत्रासनिर्णाशहेतवे॥ श्रीमद्भागवतं शास्त्रं कलौ कीरेण भाषितः॥ २६॥
एतस्मादपरं किंचिन्मनःशुद्ध्यै न विद्यते॥ जन्मांतरीयपुण्यौघैः शुभश्रवणात्सम्भवेत्॥ २७॥ परीक्षिते
कथां वक्तुं सभायां संस्थिते शुके॥ सुधाकुंभं गृहीत्वैव देवास्तत्र समायपुः॥ २८॥ शुकं नत्वाऽवदन्सर्वे
स्वकार्यकुशलाः सुराः॥ कथासुधां प्रयच्छत्वं गृहीत्वैव सुधामिमाम्॥ २९॥ एवं विनिमये जाते सुधा रा-
ज्ञा प्रपीयताम्॥ प्रपास्यामो वयं सर्वे श्रीमद्भागवतामृतम्॥ ३०॥ क्व कथा क्व सुधा लोके क्व काचः क्व
महामणिः॥ ब्रह्मरातो विचार्यैत्थं तदा देवाञ्जहास सः॥ ३१॥ अयोग्यांस्तांस्तु विज्ञाय न ददौ स क-
थामृतम्॥ एवं भागवती वार्ता देवानामपि दुर्लभा॥ ३२॥ राज्ञो मोक्षं तथा वीक्ष्य सत्यं ब्रह्मापि विस्मितः ॥ ७ ॥

सत्यलोके तुलां बध्वा शास्त्राण्यातमतोलयत्॥ ३३॥ लघून्यन्यानि जातानि गुरुत्वेकमिदं महत्॥ तदा ऋ-
षिगणाः सर्वे विस्मयं परमं ययुः॥ ३४॥ मेनिरे ते हरेरूपं शास्त्रं भागवतं ततः॥ पठनाच्छ्रवणात्सद्यो वै-
कुंठफलदायकम्॥ ३५॥ एतद्दृष्ट्वा समाश्चर्यं सर्वे वै लोकवासिनः॥ सप्तस्कामास्त देवे कमाडिपे तत
चाऽपरम्॥ ३६॥ निवृत्तिमार्गस्याचार्याः कपिलः सनकादयः॥ इदमेवाद्रियंते स्म पुराणं परया मुदा॥
३७॥ प्रवृत्तिमार्गस्याचार्या मरीचिप्रमुखास्तथा॥ इदमेवादरान्नित्यं जगृहुः शुभकर्मसु॥ ३८॥ श्वेतद्वीपे
निरन्त्रापे मुक्तास्तु बदरीवने॥ कश्यपस्त्वेतदेवप्रायाधाम्येनासिषेविरे॥ ३९॥ श्रुतिस्मृतिपुराणानि नि-
राधाराणि तर्हि तु॥ ब्रह्माणमेत्य सद्वारणं प्रोचुः शोकहृत्ताम्नि च॥ ४०॥ देवदेव जगद्धातस्त्वमस्माकमधीश्वरः
॥ न वर्तामि परं कष्टमस्माकं श्रोतुमर्हसि॥ ४१॥ श्रीमद्भागवतस्यैव गुरुत्वात्सर्वशास्त्रतः॥ जाता प्रवृत्ति-
र्हि लोके सर्वत्र शुभकर्मसु॥ ४२॥ अस्मांस्तु कोऽपि दृष्ट्वापि न पठत्यादरान्विभो॥ अतो नामाऽपि नो लोके
नश्यात्ते स्वे च भातिनः॥ ४३॥ जीविताशां विहायैव ततस्त्वां शरणं गताम्॥ पातुमर्हसि नो धातर्यतस्त्वं लोक-
भावनः॥ ४४॥ तासां तासां ततो ब्रह्मा श्रीमद्भागवतं प्रति॥ उवाचेमा जाता तपः स्थानाऽतिकष्टा स्वयाऽनुप
॥ ४५॥ न्वयेवैकाकिना तातविज्ञाप्ये तान्विनानुकंचित॥ न गम्यमिति मद्वाक्यं त्वं पालयितुमर्हसि॥ ४६॥

॥भ॰ श्री॰ भा॰ तदा भागवतं प्राह तं प्रणम्य पितामहम्॥ अद्य प्रभृति वक्ष्यामि पुराणानां हि मे रतिः॥४७॥ आधिक्यं न स्व- श्री॰ ॥
॥ ६ ॥ तोऽभीष्टं मम मास्तीत्यवगच्छ भो॥ किं तु त्वयातो जनेन व्यासेन च कृतं हितम्॥४८॥ सांप्रतं च यथाऽज्ञा-
तेः करिष्यामि तथा विभो॥ इति तस्य वचः श्रुत्वा प्रसन्नोऽभवदात्मभूः॥४९॥ पुराणानां तु संख्यायां पंचम्या-
मेव हि विधिः॥ पुराणं स्थापयामास श्रुतिशानार्चनादिषु॥५०॥ श्रुतिस्मृतिपुराणानि तदेवाजं यतद्धिना-
ता॥ सर्वाणि पोषणं प्रापुः सर्वदा च तदन्वयुः॥५१॥ श्रीमद्भागवतस्याऽस्य संख्या श्रुतजेऽस्थिते॥ विख्या-
ता पंचमी संख्या शतादिर्म्माऽभूद्दश॥५२॥ तदिदं श्रीभागवतं ब्रह्मसम्मितम्॥ सेव्यते पुरुषैर्धन्यैर्दुर्ल-
भेऽत्र नराधिप॥५३॥ धर्म्मा भागवती वार्त्ता प्रेतपीडाविनाशिनी॥ समारोपितया धर्म्मः कृष्णलोकफल-
प्रदः॥५४॥ दहंति सर्वपापानि सप्ताहश्रवणक्षणे॥ अस्माकं प्रलयं सद्यः कथेयं हा करिष्यति॥५५॥ आर्द्रं
शुष्कं लघु स्थूलं वाङ्मनःकायसंभवम्॥ श्रवणं प्रदहेत्पापं पावकः समिधो यथा॥५६॥ अस्मिन्वै भारते व-
र्षे सूरिभिर्देवसंसदि॥ अकथाश्राविणां पुंसां निष्फलं जन्म कीर्तितम्॥५७॥ किं मोहतो रक्षितेन सुपुष्टेन
बलीयसा॥ अध्रुवेण शरीरेण शुककशास्त्रकथां विना॥५८॥ अस्थिस्तंभं स्नायुबद्धं मांसशोणितलेपि-
तम्॥ चर्मावनद्धं दुर्गंधपात्रं मूत्रपुरीषयोः॥५९॥ जराशोकविपाकार्त्तं रोगाणां मंदिरं परम्॥ दुष्पूरं च ॥ ८ ॥

कृतघ्नं च सदोषं क्षणभंगुरम्॥६०॥ कृमिविड्भस्मसंज्ञांतं शरीरमिति वर्णितम्॥ तेन संसाधयेद्धीमान्स्व-
कार्यं यः स पंडितः॥६१॥ प्रातः संस्कृतं चान्नं सायं तत्तु विनश्यति॥ तदीयरससंपुष्टे काये का नाम
नित्यता॥६२॥ बुद्बुदा इव तोयेषु मशका इव जंतुषु॥ जायंते मरणायैव कथाश्रवणवर्जिताः॥६३॥ श्रीमद्भा-
गवतं पुराणममलं यद्वैष्णवानां प्रियं यस्मिन्पारमहंस्यमेकममलं ज्ञानं परं गीयते॥ यत्र ज्ञानविरागभ-
क्तिसहितं नैष्कर्म्यमाविष्कृतं तच्छृण्वन्विपठन्विचारणपरो भक्त्या विमुच्येन्नरः॥६४॥ इत्थं मया भाग-
वतस्य तुभ्यं माहात्म्यमुक्तं नृपते तु तस्मात्॥ महाफलप्रापकमेव नृणां स्वधर्मयुग्भक्तिमतां सदैव॥६५॥
इति श्रीसत्संगिजीवने नारायणचरित्रे धर्मशास्त्रे चतुर्थप्रकरणे पुराणश्रवणे सर्वविशेषतः श्रीमद्भाग-
वतमाहात्म्यनिरूपणनामाष्टत्रिंशोऽध्यायः॥ ३ ॥श्रीनारायणमुनिरुवाच॥ अथैतस्य पुराणस्य विधा-
नं श्रवणं स्मृते॥ कथयामि नृपश्रेष्ठ श्रोतॄणां हितकारकम्॥१॥ आरंभणीयास्य गृहे धनिकैः पुरुषैः क-
था॥ अन्यैर्नरैस्तु संहसदेवतामंदिरादिषु॥२॥ विवाहे यादृशं चित्तं स्वपुत्रस्य नृणां भवेत्॥ कथाप्रारंभ-
णे तादृक्कार्यमुत्साहितं नृप॥३॥ निर्विघ्नेन समाप्त्यर्थमादौ गणपतिं यजेत्॥ सिंदूरेण च दूर्वाभिः पु-
ष्पैश्च गुडलड्डुकैः॥४॥ अन्वहं संहितापाठैः शृणुयाद्द्विपूरुषः॥ तदा तु भोजनात्पूर्वं सायं चोभौ जनौ तत्र

॥स॰मा॰च॰६॥ म्॥ ५॥ आनुकूल्यं यदि श्रीतो तुं मिलत्यं न स्यात्तदा नृप॥ अनवरतमिव वृष्णु गुवाज्ञा तुर्मास्ये नुप्रहृषः॥ ६॥ पौषमासं अ॰ ४॥
॥ ८ ॥ विनैकं तु प्रारम्भे स्यात् अखिलाश्वपि॥ मासाः पुण्यावहाः स्मृतिमत्तमास स्युर्नृपते॥ ७॥ मासमेवेतेषु यत्र स्या
ज्जनस्य ताश्वस्य चेतसः॥ तस्मिन्भागवतस्यैव नुराणां पापसंहृत्॥ ८॥ मासद्वयं वा मृगुणु पादुक्तमासे कुमा
नवः॥ नाहिन्वम्यां वा श्वरम्य कार्तिकी पूर्णिमावधि॥ ९॥ आरभ्योर्जनवम्यां वा माघोन्तं तु समापयेत्॥ तपोन
वम्यां वारम्य चैत्रे तं तेषु गुण्यान्नरः॥ १०॥ मसादेशपणपाशुहितदान्तकैपुमास्तु च॥ नवम्यादि पूर्णिमा तस्मि
कस्मिन्स्तु गुण्यान्नरः॥ ११॥ देशान्तरान्निजानन्ताती मारूपेष्वसुरुज्ज्वनानि॥ येषां लच्छवर्णेश्र द्वातो आरभ
दिनोत्तुरा॥ १२॥ देशोदेशे विरक्तायेवैद्य वादिभवर्जिता॥ मत्रैते भोऽपि मे लेख्य मागतां लोश्च नामयेत्
॥ १३॥ अर्वा कूपं चाहतो यन्मात् दासनादीनि मेजयेत्॥ विशालां वक्तधाम च कुर्यात्तत्र कथास्थलम्॥ १४॥
कुर्वीत मंडपं तत्र शुचौ स्थाने मनःप्रियम्॥ रम्भास्तंभैश्च सद्वस्त्रैः फलैः पुष्पैश्च शोभनम्॥ १५॥ तत्रोपवेश
स्थानानि स्त्रीणां पुंसां यथोचितम्॥ आमासनेन च रुचिरं रैन येत्तु तु रोनरः॥ १६॥ तस्मिन्नीवेषु या वृद्धेम्
कुलेत्तु पुराणिनम्॥ संस्थापयेत्तु स्तकं च चतुरेगे निधारयेत्॥ १७॥ ततः पुराणाधिदेवं कृष्णं भागवता
कृतिम्॥ मंत्रैः समर्चयेदेतैर्मुख्यः श्रोता कृताह्निकः॥ १८॥ प्रथमादिहादशांतास्कंधायस्यपदादयः॥ ॥ ५ ॥

मोक्षाश्रयप्रदं दिव्यास्तं कृष्णं चिंतयाम्यहम्॥ १९॥ नवीननीरदोद्दिक्तवर्णं सुंदरविग्रहम्॥ ज्ञारत्ना
दंगावंशज्ञाभाविनिंदासमनुत्तमम्॥ २०॥ ज्ञारजत्पोदयान्तानां प्रभाशीचनम्॥ सर्वांगसौंदर्यशोभाभी
रत्नभूषणभूषणाम्॥ २१॥ गोपीलोचनकोणैश्च प्रसन्नैरतिवल्कितैः॥ ज्ञाम्यन्निरीक्ष्यमाणं तस्यापि
रिचविनिर्मितम्॥ २२॥ स्वार्चापरमाराधाहृत्कोरसुधाकरम्॥ सजलसारनिर्माणकिरीटोज्ज्वलशे
खरम्॥ २३॥ विनोदमुरलीहस्तं सेवितं च सुरासुरैः॥ कौस्तुभोद्भासितोरस्कं तमीश्वरमहं भजे २४
॥**अथ वाहनमंत्रमाह**॥ कलिकल्मषनाशाय प्रादुर्भूतं कृपाभरात्॥ श्रीमद्भागवताकारं कृष्णमावाह
याम्यहम्॥ २५॥ **अथासनमंत्रमाह**॥ सिंहासनमिदं कृष्ण स्वर्णरत्नविनिर्मितम्॥ तव प्रीतिकरं दत्तं गृ
हाण कृपया प्रभो॥ २६॥ **अथ पाद्यमंत्रमाह**॥ अनन्यभावाप्रपिणा संसारार्णवतारक॥ पाद्यं गृहाण देवे
शश्रीकृष्ण कृपयामपि॥ २७॥ **अथार्घ्यमंत्रमाह**॥ नानावतारचरितैः साधुसंकष्टनाशन॥ अर्घ्यं गृहा
णश्रीकृष्ण गंधाद्यष्टांगसंयुतम्॥ २८॥ **अथ आचमनीयमंत्रमाह**॥ गोकुलक्रीडनानंदमहेंद्रादिमदाप
ह॥ श्रीवृंदावनपूर्णेश गृहाणाचमनीयकम्॥ २९॥ **अथ स्नानमंत्रमाह**॥ यमुनाजलसंचारिकालि
यफणामर्दन॥ जलक्रीडारते कृष्ण स्नानीयं प्रतिगृह्यताम्॥ ३०॥ **अथ वस्त्रनिवेदनमंत्रमाह**॥ पीतां

॥स॰जी॰च॰॥ बरमिदं कृष्ण नवीनं स्वर्णवर्णकम्। तदेव परिधानार्थं गृह्यतां नंदनंदन॥ ३१॥ ॥अथ यज्ञोपवीतार्पणमंत्रमाह॥ सावित्रीग्रंथिसंयुक्तं स्वर्णतंतुविनिर्मितम्। गृह्यतां देवदेवेश ब्रह्मसूत्रमिदं शुभम्॥ ३२॥ अथाभूषणानि दिव्यानि कुंडलादीनि सत्पते। गृहाण कृपया कृष्ण दत्तानि मानि भक्तितः॥ ३३॥ ॥अथ चंदनाभिर्पणमंत्रमाह॥ घनसाररसोपेतं कुंकुमेन सुशोभितम्। गृहाण चंदनं दिव्यं देवकीनंदन प्रभो॥ ३४॥ ॥अथ पुष्पतुलस्यादिमालिकार्पणमंत्रमाह॥ नानासुगंधिपुष्पाणां हारान्पीठांस्तथैव च। तुलसीवनमालां च श्रीकृष्ण स्वीकुरु प्रभो॥ ३५॥ सुगंधतैलद्रव्यार्पणमंत्रमाह॥ सुगंधीद्रव्यवासाद्यं दिव्यं तैलं मनोहरम्। वांछितं सर्वलोकानां भगवन् प्रतिगृह्यताम्॥ ३६॥ ॥अथ धूपनिवेदनमंत्रमाह॥ बालक्रीडाविनोदेन पूतनाप्राणहारक। कंसादिदुष्टदमन धूपः स्वीक्रियतां त्वया॥ ३७॥ ॥अथ दीपनिवेदनमंत्रमाह॥ स्वयंप्रकाशमानेशानेकभास्करभास्कर। गृहाण कृपया दीपमंधकारनिवारकम्॥ ३८॥ ॥अथ नैवेद्यनिवेदनमंत्रमाह॥ नानापक्वान्ननैवेद्यं रसैः षड्भिर्मनोहरम्। विश्वंभर गृहाणेदं श्रीश मे वरदो भव॥ ३९॥ ॥अथ मध्ये पानीयार्पणमंत्रमाह॥ पवित्रं निर्मलं तोयमुशीरैलादिवासितम्। जीवनं सर्वजीवानां पानार्थं गृह्यतां हरे॥ ४०॥ ॥अथ पुनराचमनीयसमर्पणमंत्रमाह॥ निर्म

॥१०॥ ॥अ॰४॥ ॥१०॥

लं पानमुनेतोयं सुपवित्रं सुवासितम्। पुनराचमनीयं च गृह्यतां मधुसूदन॥ ४१॥ ॥अथ तांबूलार्पणमंत्रमाह॥ तांबूलं पूगसंयुक्तं लवंगैलाविमिश्रितम्। जातिफलादिसंयुक्तं श्रीकृष्ण प्रतिगृह्यताम्॥ ४२॥ ॥अथ नालिकेरीफलार्पणमंत्रमाह॥ दिव्यफलानां सर्वेषां सर्वदेवप्रियंकरम्। नालिकेरीफलमिदं गृहाण मधुरापते॥ ४३॥ ॥अथ दक्षिणार्पणमंत्रमाह॥ यथाशक्ति मया दत्ताः स्वर्णरूप्यादिमुद्रिकाः। श्रीद्वारिकापुराधीश दक्षिणा गृह्यतां त्वया॥ ४४॥ ॥अथ नीराजनमंत्रमाह॥ नीराजनमिदं देवेशानमस्ते सोतिपांपते। आरार्त्रिकं मया दत्तं गृहाण कमलापते॥ ४५॥ ॥अथ प्रदक्षिणाचरणमंत्रमाह॥ नमस्ते देवदेवेश शंखचक्रगदाधर। त्वत्प्रदक्षिणया कृष्ण ब्रह्मांडानां प्रदक्षिणा॥ ४६॥ ॥अथ नमस्कारसमर्पणमंत्रमाह॥ उद्धारणाय सर्वेषां प्रादुर्भूतो धरातले। श्रीमद्भागवतरूपं त्वां श्रीकृष्ण प्रणमाम्यहम्॥ ४७॥ ॥अथ प्रार्थनामंत्रमहाभाष्याम्॥ निजकर्मविपाकेन भवाब्धौ पतितोस्म्यहम्। तं मामुद्धर देवेश कृपया करुणानिधे॥ ४८॥ श्रीमद्भागवताख्यं त्वं प्रत्यक्षः कृष्ण एव हि। मयि त्वच्छरणापाते कृपां कुरु जगत्पते॥ ४९॥ इत्थं संपूज्य विधिना कृष्णं भागवतात्मकम्। वक्तारं पूजयेद्भक्त्या गंधपुष्पस्रगादिभिः॥ ५०॥ नवीनवस्त्राभरणैर्दत्वा संपूज्य दक्षिणाम्। ततः पूर्वोक्तमंत्रेण नत्वा तं प्रार्थयेत्सु

मान् ॥५१॥ आसन्नूपश्च बोद्धृत्वं सर्वज्ञत्वं विशारदः ॥ तत्कथापप्रकाशेन मद्दत्तानं विनाशय ॥५२॥ सं 
प्राप्य पौराणिकमित्थममान् श्रोतृंश्च विप्रान्सपर्यार्हमर्हेत् ॥ श्रोता च स्वकीयैर्नियमैरुपेतः शृं
णोतु नृपाज्ञ पुराणमेतत् ॥५३॥ इति श्रीसत्संगिजीवने नारायणचरित्रे धर्मशास्त्रे चतुर्थप्रकरणे श्र
वणीत्सवे श्रीमद्भागवतश्रवणविधौ पूजाविधिनिरूपणनामा चतुर्थोऽध्यायः ॥ ५ ॥ श्रीनारायण
मुनिरुवाच ॥ अथ येनियमा राजन् श्रोतृवक्तृहिता वहाः ॥ कथयामि यथा वृत्तान् पुराणप्रथितानहम्
॥१॥ गुणभेदात्त्र वक्तारः श्रोतारश्च त्रिधा मताः ॥ उत्तमाः सात्त्विका एव यथोक्तफलभागिनः ॥२॥
आसंगतमविस्पष्टं विस्तरं रसवर्जितम् ॥ पदच्छेदविहीनं च तत्त्वभावविवर्जितम् ॥३॥ उत्साहवर्जितं
यश्च वाचयेदृत्यपरूपकः ॥ क्रोधनो विप्रियवादी च लोभिष्ठः स्त्रीसमीक्षकः ॥४॥ सम्यग्ग्रंथार्थमविदन्भ
गवद्भक्तिवर्जितः ॥ वाचकस्तामसो ज्ञेयः सर्वाधम इतीरितः ॥५॥ स्पष्टाक्षरपदं शान्तं किंचिद्दीर्घतरं त
था ॥ कालस्वरसमायुक्तं रसभावविवर्जितम् ॥६॥ अनुलं वाचयेद्यस्तु लुब्धः क्रूरः क्वचित्क्वचित् ॥ प्री
तिमांश्च रसास्वादे स्वालंकारधारिणी ॥७॥ अबुध्यमानो ग्रंथार्थं भक्तो भगवतोऽपि सन् ॥ वाचकः स तु
विज्ञेयो राजसो मध्यमश्च सः ॥८॥ मरसं सुस्वरं धीरं तत्त्वभावसमन्वितम् ॥ स्पष्टाक्षरविनिर्देशं च सो ज्ञाहं ॥२१॥

नीतिविस्तरम् ॥९॥ शांतं च वाचयेद्यस्तु शुद्धात्मा ह्रद निस्पृहः ॥ संप्रदायाध्ययनवान् ग्रंथार्थकुशल
श्री विदन् ॥१०॥ जितेंद्रियः सुशीलश्च दुराग्रहविवर्जितः ॥ यथार्थवादी वाग्मी च श्रोतृबोधनेपु
णः ॥११॥ यदृच्छालाभसंतुष्टः करुणो निरहंकृतिः ॥ मृदुस्वभावः शांतश्च भगवद्भक्तिसंयुतः ॥१२॥
लोकापवादरहितः प्रतिग्रहपराङ्मुखः ॥ जितकामो जितक्रोधो जितलोभो ह्यनिःस्पृहः ॥१३॥ मैत्री
धीरः साधुवृत्तिर्निर्दंभो निष्किंचनस्तथा ॥ उपकारी वाचकस्तु सात्त्विकश्चोत्तमो मतः ॥१४॥ सात्त्विकेज
क्षणैर्युक्तः श्रीमद्भागवतवाचकः ॥ प्रत्यहं स्नानिकं कुर्यादुषस्युत्थाय बुद्धिमान् ॥१५॥ ततः श्रोतृभिरा
हूतः स कथामंडपं व्रजेत् ॥ प्रक्षाल्य पाणिपादाभ्यां कुर्यादाचमनत्रयम् ॥१६॥ धौतश्वेतांबरधरः स
मुरं हृदये स्मरन् ॥ विप्रान्साधून्नमस्कृत्य श्रीमद्भागवतं नमेत् ॥१७॥ ततः सपूज्य गुर्वादेः राज्ञया विन
यान्वितः ॥ उदङ्मुखः प्राङ्मुखो वा स्वासनमुपाविशेत् ॥१८॥ श्रोतृभिः पूजितः सोऽथ कुर्यान्मंगलमा
दितः ॥ यं ब्रह्मवेत्तेमिलादिश्लोकत्रयमुदीरयेत् ॥१९॥ कर्मयेनेतिपर्यन्तं स्वेष्टपद्यान्ततः परम् ॥ पठित्वा
पुस्तकं नत्वा ततः पद्यमिदं पठेत् ॥२०॥ प्रयतोदवदिवेज्ञानारायणजगत्पते ॥ त्वदीयैनावधानेन कथ
यिष्यत्स्वमाः कथाः ॥२१॥ इति पद्यं पठित्वैव वाचयेत्स कथां बुधः ॥ साधून्विप्रान्विजानौ न कुर्यादर्थं नयो

॥ स·जी·च ॥ श्रितः ॥ २२ ॥ समाप्तिं रेते ऽध्यायस्य यस्य न स मनः ॥ न तत्र तत्र विरमेदध्यायांस्तान पि ब्रुवे ॥ २३ ॥ तत्राद्ये स्कंधप्रथमा अ०५ ॥
॥ २२ ॥ ध्यायादष्टमो दशमस्तथा ॥ चतुर्दशः षोडशश्च निषिद्धा विरता विमे ॥ २४ ॥ तृतीयस्याष्टमश्चैव तिर्हो द्वितीये नि
षिद्धिसौ ॥ सप्तर्षिभिस्ततः कार्या तदेते विरतिर्नहि ॥ २५ ॥ दशमः सप्तमश्चाद्यस्तृतीये ऽष्टादशस्तथा ॥ त्रयो
विंशश्च विरतौ समतान बुधैर्नृप ॥ २६ ॥ आद्यस्तृतीयो दशमस्तुर्ये सप्तदशस्तथा ॥ अष्टाविंशश्च नाध्याया
विरतौ शुभदा नृणाम् ॥ २७ ॥ पंचमे पंचमो ध्यायो विषिद्धस्तत्र षोडशः ॥ षष्ठे षष्ठः पंचमस्तत्र षष्ठो दशम
स्तथा ॥ २८ ॥ सप्तमे त्रयमस्तुर्यः षष्ठः स्कंधे यथाष्टमे ॥ आद्यो ऽष्टमो द्वितीयश्च दशमश्चैकविंशकः ॥
२९ ॥ नवमे पंचदशकौ दशमस्तुर्य आदिमः ॥ अध्याया विरतौ नैते गृह्णीतां मुनिभिर्नृप ॥ ३० ॥ दशमेद
शमश्चाद्यो द्वाविंशो नवमस्तथा ॥ त्रय एकोनत्रिंशश्च द्विषष्टितम एव च ॥ ३१ ॥ पंचसप्ततितमः सप्तस
प्ततितमस्तमी ॥ निषिद्धा वीरतौ संति पंडितैः पौराणिकैरपि ॥ ३२ ॥ एकादशे तु दशमो द्वाविंशस्त्रिंश
एव च ॥ द्वादशे नवमस्तेक रस्य ऽध्याय मयोदिताः ॥ ३३ ॥ एषां मतेन विरतिः कार्या पौराणिकैः क्वचि
त् ॥ निसैकाध्याय पाठानाम पेष विधिरिष्यते ॥ ३४ ॥ मासपक्षादिनियमादिनसंख्यानुरूपतः
॥ अध्यायान्वाचयेन्नित्यं ततः कुर्यात्समापनम् ॥ ३५ ॥ मुहूर्ते घटिकां वापि कथांते नाम कीर्त्तनम् ॥ २२ ॥

कां वापि कथांते नाम कीर्त्तनम् ॥ कुर्यात्प्रतिदिनं विप्रो रुक्तरेदासनात्ततः ॥ ३६ ॥ पुनर्न्नत्वा स्वगुर्वादी
न्गच्छेद्धि द्वान्निजं गृहम् ॥ कथासमाप्ति पर्यंतं नित्यमेवं समाचरेत् ॥ ३७ ॥ कथारंभदिनाद्यावद्व
मासं न्यस्तनाद्देत् ॥ अन्नं प्रतिग्रहं वापि पापमीरुः स पंडितः ॥ ३८ ॥ न दद्युः स्वस्य पर्यासं श्री
तारः प्रत्यहं यदि ॥ अन्नं तदा तदन्यदत्तं गृह्णीयान्नान्यत्र पानकम् ॥ ३९ ॥ सप्ताहे वा दशाहे च पक्षपारा
यणे तथा ॥ मासपारायणे ऽप्येष विधिस्तस्य प्रकीर्तितः ॥ ४० ॥ वार्त्ताकं नैव भुंजीत न कुर्यात्स्वाति भो
जनम् ॥ न रोगरुज्ज्वलाकादितैलं कुंकुं च वर्जयेत् ॥ ४१ ॥ ब्रह्मचर्यमहिंसां च सत्यमात्तेस्थिचैव पालयेत्
॥ कथाविघ्नकरं यत्त्कर्म कुर्यान्न कर्हिचित् ॥ ४२ ॥ पुराणवक्तुर्नृपते मयेत्थं प्रोक्तानि लक्षणानि य
मांश्च सर्वे ॥ लक्षणानि यमांश्च सर्वे ॥ लक्ष्माणि वक्ष्याम्यधुना च तुभ्यं तच्छ्रोतृपुंसां नियमांश्च पञ्चान्
॥ ४३ ॥ इति श्रीसत्संगिजीवने नारायणचरित्रे धर्मशास्त्रे चतुर्थप्रकरणे पुराणश्रवणे श्रवणे भगवत्
श्रवणविधौ वक्तृलक्षणनियमनिरूपणनामा पंचमोऽध्यायः ॥ ५ ॥ श्रीनारायणमुनिरुवाच ॥ अ
श्रद्धाभक्तिविहीनो यो जो मिश्रो रूपकस्तथा ॥ हेतुवादपरो राजन्नश्मस्तूया समन्वितः ॥ १ ॥ वक्तृनरक्षि
णो दद्यात्सुप्तो हेच समापते ॥ अतिप्रश्नांश्च यः कुर्यात्कुमश्रोतानाम सोऽधमः ॥ २ ॥ कथाप्रसंगाच्च

॥भा॰मा॰अ०॥ णुवाच्छूद्रादीनोपि यः पुमान् ॥ दशारजाशातस्थाने स्वपादर्शं च दर्शयेत् ॥३॥ दांभिको मत्सरग्रस्तो अ०६॥
॥१३॥ मानी चाऽपस्थिरासनः ॥ क्षणं रुष्टः क्षणं तुष्टः श्रोता राजसमध्यमः ॥४॥ मंत्रस्य सर्वकार्याणि
भक्तिश्रद्धासमन्वितः ॥ पुराणं शृणुयान्नित्यं किन येनान्वितश्च यः ॥५॥ वाचकं पूजयेन्नित्यं काले
काले च दक्षिणाम् ॥ यथोचितं प्रदद्याच्च श्रोतृन्सर्वान्समानयेत् ॥६॥ निर्मत्सरेण भगवति प्रेमरूढी
स्तु राहतः ॥ शृणुयाच्चैकचित्तो यः सश्रोता सात्त्विकोत्तमः ॥७॥ सात्त्विकैर्लक्षणैर्युक्तः श्रोता पुस्त
कवाचकौ ॥ पूर्वोक्तेन विधानेन संपूज्य शृणुयात्कथाम् ॥८॥ अनुष्ठानी श्रोतपादेन गर्हंश्च स्यजां
तरम् ॥ ग्राह्यं न स्वं श्रुत्वा चिरं स्थितः शृणुयात्कथाम् ॥९॥ वीरासनेनोपविश्योन्यत्र पदीर्पिदितस्ततः
॥ वार्त्तां कुर्याच्च नान्यां मंतव्ये कायमनाभवेत् ॥१०॥ संज्ञाये सति वक्तारं पृच्छेच्च शानकैर्नमन् ॥ करपा
दादिना पर्जं श्रोता कुर्यान्न संसदि ॥११॥ पाजये ब्रह्मचर्यादीन्नियमान्विजितेंद्रियः ॥ स्कंधात स्कंधसमा
तौ च दद्याच्छक्त्या च दक्षिणाम् ॥१२॥ स्कंधे स्कंधे समाप्ते च विप्रा भोज्याः शतं शतम् ॥ दक्षिणा च यथा
शक्ति तेभ्यो देया नराधिप ॥१३॥ अशक्तस्तु पुराणस्य समाप्तौ भोजयेच्छतम् ॥ तद्दिने भोजनैर्विप्रान् द
क्षिणाभिश्च तोषयेत् ॥१४॥ कथाप्रारंभदिवसे संपूज्याद्दीगणाधिपम् ॥ ब्राह्मणं वरयेदेकं गायत्रीज ॥१३॥

पहेतवे ॥१५॥ सहस्रं यं नित्यमसमाप्यवधिं संजपेत् ॥ वरणीयास्तथा चान्ये ब्राह्मणाः पंच वेदगाः ॥१६॥
॥ सहस्रपंचकं नित्यं मंत्रस्तु द्वादशाक्षरः ॥ वासुदेवस्य संप्रीत्यै जपतम्र्सेर्हतव्रतैः ॥१७॥ अन्नव
स्त्राणि तेभ्योपि दद्यादंते च दक्षिणाम् ॥ श्रोतृभ्यश्चापि विप्रेभ्यः शक्त्या दद्याच्च दक्षिणाम् ॥१८॥ मज
नुजानयार्थं चयावस्याहारः सुखावहः ॥ हविष्यान्नेनैकभक्तं श्रोता कुर्याच्च तोन्नृप ॥१९॥ उपवासाः प्र
कर्त्तव्याः सप्ताहे समवासरान् ॥ फलाहारमशक्तस्तु कुर्याद्वापि पयः पिबेत् ॥२०॥ अशक्तान्निर्जवर्णं वा
ऽन्नये कभक्तं च वाचरेत् ॥ कथाश्रवणपर्वेरां तं कर्त्तव्यं श्रवणोर्चिंता ॥२१॥ भोजनं तु वरं मन्ये कथा
श्रवणकारकम् ॥ नोपवासो मतः श्रेष्ठः कथाविघ्नकरो यदि ॥२२॥ स्थिरा तु प्रतिमा विष्णो यद्दिनस्याल
शाचर्जम् ॥ अग्रे संस्थापयेद्भक्तः कथारंभे दिने दिने ॥२३॥ सौवर्णीमिव सप्ताहे कारयेत्प्रतिमां हरेः ॥ सं
स्थाप्य पूजयेन्नित्यं तत्रैव दिनसप्तकम् ॥२४॥ कथासमाप्तौ तां दद्याद्ब्राह्मणाय सदक्षिणम् ॥ अशक्त
स्तु यथाशक्ति विधिं कुर्यात्समाहितः ॥२५॥ प्रातः कार्यं कथारंभः सार्द्धयामत्रयावधि ॥ वाचाऽत्रविर
तिः कार्या मध्याह्ने घटिकाद्वयम् ॥२६॥ पौराणिकं तु विप्रो तेमध्याह्ने श्रोतृभिर्नरैः ॥ नामसंकीर्त्तनं
कार्यं मुहूर्त्तं रुक्मिणीपतेः ॥२७॥ समाप्ते श्रीभागवते गीता भगवतोदिता ॥ सहस्रार्यां संहिता वापि श्रव्या

॥स०जी०च०॥ सर्वार्थप्रकाशिका॥२८॥समाप्तिदिवसेकार्यंमहापूजायापनम्।सर्वेपिश्रावकाःकुर्युर्वक्तुःपूजांय ॥अ०६॥
॥२४॥ थोचितम्॥२९॥नूलकौशेयवस्त्राणिकुंडलेकरकादिकं।दद्याच्छ्रोताऽग्निमोवक्त्रेसहस्रस्वर्णदक्षि
णम्॥३०॥अशक्तस्तुस्ववर्णानांदद्याद्दशाधिकंशतम्॥तत्राऽप्यशक्तःपुरुषोधनंदद्यात्स्वशक्तितः
॥३१॥अन्येपिशक्तितोदद्युर्वस्त्रान्नेकारदक्षिणाः॥गृहस्थधर्मोपिकंदेयंयत्किंचिद्देववा॥३२॥स्वर्ण
माषोरोपकोवादक्षिणोक्तामहर्षिभिः॥श्रोतॄणामप्यवित्तानांवक्त्रेदेयाप्युपकृत्यकः॥३३॥मुख्यः
श्रोतातलोदद्याद्धेमसिंहंपजोन्वितम्॥संपूज्यवाचकायैवमंत्रमेनमुदीरयन्॥३४॥कांतारवनदुर्गे
षुचोरव्याघ्राकुलेपथि॥हिंसकानोनहिंसंतुसिंहदानप्रभावतः॥३५॥अत्रसफलेषाऽपग्रस्तुसंभवायाः
प्रशांतये॥राजापरिक्षित्प्रददौहेमसिंहंपुरानृप॥३६॥शृंगिदंष्ट्रादिहिंस्राणामधिपःसिंहएवहि॥अत
स्तद्दानेननस्यात्दुर्गतौतद्भयंनृणाम्॥३७॥धेनुंप्रयत्नतोदद्यात्ततोवक्त्रेपयस्विनीम्॥दशांशेनैवगा
यत्र्याहोमंकुर्यात्ततःपरम्॥३८॥दश्चैणपायसाज्येनततोव्याहृतिभिर्नरैः॥तिलव्रीहिहुतंहोमंकुर्वीत
चयथाविधि॥३९॥होमानुकल्पनंस्याच्चेत्तन्निष्क्रयधनंपुमान्॥दद्यान्नेनापिसंपूर्णफलंस्यान्नात्रसंश
यः॥४०॥विद्वेषप्रतितिप्रोक्तःश्रीमद्भागवतस्यतौ॥आशुकोप्यपिचविधिर्ज्ञानिभिःत्रयानृप॥४१॥दत्ते ॥२४॥

धानेनपुराणमेतच्छृण्वंतियेभूमिपालेनशास्ते॥फलंपुरोक्तंसकलंलभेतेस्वामीएमत्रापिपरत्रनून
म्॥४२॥इतिश्रीसंजीवनेनारायणविरचितेधर्मशास्त्रेचतुर्वर्गकरणेपुराणश्रवणेअंकेभागव
तश्रवणविधौश्रीकृष्णधर्मनिरूपणनामाषष्ठोऽध्यायः॥६॥श्रीनारायणमुनिरुवाच॥श्रीमद्भागवत
स्याथविधिंदानस्यवच्मिते॥संपूर्णंस्यात्फलंयेनशुचितद्दानकारिणम्॥१॥पौर्णमासीप्रोष्ठपदीमु
ख्यःकालोऽत्रकीर्तितः॥पौर्णमास्योऽखिलावापिव्रतोत्सवदिनामपि॥२॥पुस्तकंलेखयेदादौश्रीमद्भा
गवतस्यतु॥हृदपत्रेस्पष्टवर्णमसंमिश्रितपंक्तिच॥३॥नवीनंशोधयित्वातत्सूत्रैःकलकवेष्टने॥निबध्य
स्थापनीयंचलक्षणंतस्यतेब्रुवे॥४॥वेदांतसूत्रैर्गायत्र्यापरब्रह्मनिरूपकैः॥यत्सारंभोभवेत्तेयंश्री
मद्भागवतेऽखिलम्॥५॥वृत्तासुरवधोयत्रवर्णितःस्यात्सविस्तरम्॥यच्चप्रोक्तंशुकेनैवश्रीमद्भागवतं
चतत्॥६॥अष्टादशसहस्राणिश्लोकायस्यचकीर्तिता॥द्वासप्तवारहपायानांकल्पानांयत्रसत्कथा
॥७॥आदिमध्यावसानेषुवैराग्याख्यानसंयुतम्॥हरिलीलाकथाव्रातामृतानंदितसज्जुरम्॥८॥वासु
देवपरंतद्धिश्रीमद्भागवतंनृप॥हैमेसिंहासनेरम्येस्थापयेद्दानवासरे॥९॥पुराराजापरीक्षित्तुहैमं
सिंहासनंमहत्॥अमूल्यंरत्ननिचितंपुस्तकार्थमचीकरत॥१०॥श्रीमद्भागवतंतस्मिन्निधायनगवा

॥स॰नी॰च॰॥ ऽम्बुकः॥ वाचयित्वा समस्तं मे द्विकृष्णे तद्वीपं जगाम ह॥२१॥ निर्जने नैनिःस्पृहे तस्मिन्नम्बुकदे वेग तेन ततः॥ आ ॥अ॰७॥
॥१५॥ नर्चे हेमपीनस्थं तच्चूर्णभागवतं नृपः॥२२॥ रूपाचार्याय तस्माद्दानं ततो राजा च दक्षिणाम्॥ जज्ञमे कं
कवर्णानां दत्त्वा वैकुंठमापसः॥२३॥ तथा कर्तुमशक्तास्तु स्वस्वशक्त्यनुसारतः॥ हैमं सिंहासनं रम्यं का
र्येच्छाव्यवर्जितः॥२४॥ कुर्याद्दिमं पत्रमेकमल्पवित्तस्तु मानवः॥ पत्रयोन्मिले तत्र पुस्तकं स्थापयेत्तु
तत्॥२५॥ कुर्याद्दलयवित्तस्तु १ जाईस्वर्णपत्रकम्॥ सिंहचित्रे तत्र कृत्वा स्थापयेत्सुस्तकं पुमान्॥२६॥
ततः पूर्वोदितैर्मंत्रैर्गीतवाद्यपुरःसरम्॥ उपचारैर्यथालब्धैः पूजयेत्तु दारधीः॥२७॥ ततः प्रतिगृही
तारं पूजयेच्छास्त्रणं नरः॥ श्रीमद्भागवतस्त्रिग्धं हरेर्भक्तं जितेंद्रियम्॥२८॥ वस्त्रैर्नवीनैः कौशेयैः स्वर्ण
मुक्तादिभूषणैः॥ गंधपुष्पोपहारैस्तं संपूज्य प्रणमेत्सुमान्॥२९॥ निषीदेत्स्वाम्बुखो दातागृहीतोद
ड्मुखस्तथा॥ संकल्पं दद्यान्तद्गृहीमंत्रानेनानुदीरयन्॥३०॥ अनेककोटिजन्मोत्थं कृतमन्यत्तराय ह
त्॥ दुरितं नाशमायातु दानेनानेन मेऽखिलम्॥३१॥ श्रीमद्भागवतं दिव्यं पुराणं वेदसम्मितम्॥ ददामि
विप्रवर्याय वासुदेवः प्रसीदतु॥३२॥ मास्तु रूप्यवियोगो मे मा वियोगोऽस्तु तत्क्षणात्॥ दानेनानेन सु
प्रीतो हरिर्दत्तां मनीषितम्॥३३॥ मन्त्रमुच्चार्य सतदत्त्वा ततो दद्याच्च दक्षिणाम्॥ स्कवर्णानां शतं वापि शतं ॥१५॥

वापि शतं वा रूप्यमुद्रिकाः॥३४॥ असामर्थ्यं वापि शक्त्या दद्यात् दक्षिणाम्॥ दक्षिणायाश्चानुरू
पं भोजयेद्ब्राह्मणांस्ततः॥३५॥ य एतेन विधानेन दद्याद्भागवतं पुमान्॥ सभार्यस्तु विमानेन वैकुंठं प्र
तिपद्यते॥३६॥ मनोभिवांछितान् सत्त्वभोगान् प्राप्नोति सर्वशः॥ नापाप्यं विद्यते किंचित्तस्य रूप्यप्रसा
दतः॥३७॥ अपुत्रः प्राप्नुयात्पुत्रं निर्धनो धनमाप्नुयात्॥ श्रीमद्भागवतदानेन विद्यां विद्यार्थ्यवाप्नुया
त्॥३८॥ इति दानविधिर्धर्मार्थदितस्ते नृपते भागवतस्य शास्त्रं हृष्टः॥ यमिहाचरतां न कापि वाल्पाऽनु
विचार्य तु न कथिष्यते दुरापा॥३९॥ इति श्रीमत्संगिनीवनेनारायणाचार्यविरचिते धर्मशास्त्रे चतुर्थप्रकरणे पुरा
णश्रवणोत्सवे श्रीमद्भागवतदानविधिनिरूपणं नाम सप्तमोऽध्यायः॥७॥ श्रीनारायणमुनिरुवाच॥ श्री
मद्भागवतस्याथ पुरश्चर्याविधिं ब्रुवे यथाप्सितिद्यतिराजर्षे पुरुषार्थचतुष्टयम्॥१॥ श्रोकार्ईलोकपार्द
वानित्यं भागवतं पठेत्॥ यः पुमान् सोऽपि संसारान्मुच्यते किमुताऽखिलम्॥२॥ एषा बुद्धिमतां बुद्धिर्यद्भा
गवतमादरात्॥ नित्यं पठेद्यथाशक्ति यतः स्यात्संसृतिक्षयः॥३॥ अशक्तो नित्यपठने मासे वर्षेऽपि वैकु
टा॥ पाठयन्निपमान्भक्त्या श्रीमद्भागवतं पठेत्॥४॥ एकाहेनैव शक्तस्तु द्व्यहेनाऽथ त्र्यहेण वा॥ पंचाभिर्दि
वसैः षड्भिः सप्तभिर्वा पठेत्पुमान्॥५॥ दशाहेनाथ पक्षेण मासेन ऋतुनापि वा॥ पठेद्भागवतं यस्तु भुक्तिमु

॥ स॰ नी॰ च॰ किंस्विद्रते ॥ ६ ॥ एते ष्वनुत्तमः पक्षः सप्ताहे च कृतः सम्मतः ॥ सकामैर्वा विनिष्कामैः श्रवणीयः सदा श्रं॰ ८॥
॥ २६ ॥ बर्हिः ॥ ७ ॥ तत्रापि पठनीयानामध्यायानां दिने दिने ॥ जमदग्निप्रणीतां ते संख्यां वच्मि सुखावहाम् ॥ ८
॥ अष्टचत्वारिंशकाः प्रथमे ऽह्नि द्वितीयके ॥ एकपंचाशदेकोनपंचाशच्च तृतीयके ॥ ९ ॥ अध्याया
श्चतुर्थे ऽह्नि त्रिपंचाशत्तु दीरिताः ॥ ततश्चैकोनपंचाशत्पठनीया ह्नि पंचमे ॥ १० ॥ एकचत्वारिंशदुक्ताः
षष्ठे ऽध्याया स्तु सप्तमे ॥ चतुश्चत्वारिंशदित्थं वाचनीयाः क्रमेण वै ॥ ११ ॥ सर्वे मासा विना पौषं पुरश्चरण
कर्मणि ॥ मताः संति तथा वाराः शनिभौमौ विना ऽखिलाः ॥ १२ ॥ आद्या चतुर्थी षष्ठी च विहाय च चतुर्दशी
म् ॥ श्रीमद्भागवतारंभे तिथयो ऽप्य ऽखिलाः शुभा ॥ १३ ॥ अश्विनी रेवती हस्तः पुष्यो मृगपुनर्वसू ॥ अनुरा
धाभिजित्स्वाती रोहिणी श्रवणोत्तरयम् ॥ १४ ॥ ऋक्षाण्येतानि पुण्यानि ग्राह्याण्यत्रोदितानि वै ॥ पुरश्चर्यास
मारंभः कर्त्तव्यस्तेषु भूपते ॥ १५ ॥ शुभे मुहूर्त्ते वरयेत्पूर्वोक्तैर्वक्तृलक्षणैः ॥ संपन्नान्ब्राह्मणांश्च चतुर्वर्ग
स्य सिद्धये ॥ १६ ॥ श्वेतानि निसधार्याणि तेभ्यो वस्त्राणि चोर्मिकाः ॥ हैमीर्दद्याच्चासनानि जलपात्राणि
कृत्स्नजाम् ॥ १७ ॥ शुश्रूषार्थानि पुणीतितेषा मन्यानुद्दिणांस्ततः ॥ उल्लोदकंपाकादि कुर्युस्ते चागमर्द्दन
म् ॥ १८ ॥ देवालये त्र सिद्धे वा पुण्यक्षेत्रे पुरातने ॥ पुरश्चरणसमारंभः कर्त्तव्यो हरिमंदिरे ॥ १९ ॥ स्थापयित्वा ॥ २६ ॥

यत्हैमीं श्रीकृष्णप्रतिमां गृहे ॥ कुर्युः पारायणं विप्रा यथानियमतन्मन्त्रहम् ॥ २० ॥ अत्राधिकृतानेनैव पुर
श्चरणमीरितम् ॥ पारायणानां नृपते श्रीमद्भागवतस्य हि ॥ २१ ॥ पूर्वोक्ताध्यायपूर्त्ते च कार्यैव विरतिः
श्रुतेः ॥ स्पष्टाक्षरं वाचनीयं आपणीयं न केनचित् ॥ २२ ॥ न त्वेतैर्ब्राह्मणैर्ग्राह्या दक्षिणान्यस्य कस्यचित्
॥ नचान्नं वस्त्राद्यपि वा ग्रहीतव्यं कदाचन ॥ २३ ॥ एकैकस्मिंश्च सप्ताहे समाप्ते सति दक्षिणाम् ॥ स्वर्ण
सप्तकं दद्याद् एकैकस्मै पृथक् पृथक् ॥ २४ ॥ नियतानां संहितानां पाठे नेता ऽखिला अपि ॥ एकीकृत्यैव
दद्यात्ता दक्षिणास्तु पृथक् पृथक् ॥ २५ ॥ स्ववर्णसप्तकं दातुमसमर्थस्तु पूरुषः ॥ दद्यात्तदर्द्धं विप्रेभ्य द
र्द्धं वा ऽल्पवित्तवान् ॥ २६ ॥ कनिष्ठां दक्षिणां दातुमपि शक्तो न यो भवेत् ॥ स विप्रान्तमयेन्नैव कुर्यादस्य
शक्तितः ॥ २७ ॥ विष्णोर्नाम सहस्रस्य पुरश्चरणमादरात् ॥ स्वयमेव प्रकुर्वीत तेना ऽपच्छांतिमाप्नुयात्
॥ २८ ॥ पुरश्चरणकर्त्ता ऽयद्दिने यस्मिन्द्विजोत्तमान् ॥ वृणुयात्तद्दिने चामी गायत्र्यादिजपा पच ॥ २९ ॥ पूर्व
वहृणुपाक्षिप्तान् जपस्य च दशांशतः ॥ होमं कुर्याद्ब्राह्मणांश्च भोजयेत्तद्दशांशतः ॥ ३० ॥ कृतो मंत्रवि
भागो ऽस्ति श्रीमद्भागवतस्य तु ॥ कश्यपेनैव मुनिना जपहोमादिसिद्धये ॥ ३१ ॥ नैरेव मंत्रैर्होतव्यं कर्त्तुं श
क्तिर्भवेद्यदि ॥ दशमस्कंधमंत्रैर्वा विभक्तैः स्तैर्नृपते ॥ ३२ ॥ होमं केचित्तु गायत्रीमंत्रेणैवर्षयो ऽब्रुवन् ॥

॥ स॰जी॰प्र॰ दादशाक्षरमंत्रेणाथवा स्कंदेवस्य केऽपि च ॥ ३३ ॥ पायसं च घृतं तैलं होमं द्रव्यमिहानघ ॥ होमात्तु कृष्णमा अ॰८ ॥
॥ २७ ॥ वेतुलवान्मंत्रेण यी मतः ॥ ३४ ॥ पारायणानि कुर्वीरन् श्रीमद्भागवतस्य वा ॥ होमार्थानि दशांशेनैव तए
व ब्राह्मणावृत्ताः ॥ ३५ ॥ पुरश्चर्यारंभदिनात्समाप्तिदिवसावधि ॥ पालनीयं ब्रह्मचर्यं विप्रैः सयज
मानकैः ॥ ३६ ॥ यथोक्तं तु फलं तस्मादन्यथेत्यस्ति निश्चयः ॥ तस्मिंस्तु प्राप्नुवन्ति सर्वे सिद्ध्यन्त्येव मनोरथाः
॥ ३७ ॥ इति संक्षेपतः प्रोक्तः पुरश्चर्याविधिर्मया ॥ राजन्स्कंदपुराणोक्तो भुक्तिमुक्तिफलप्रदः ॥ ३८ ॥
त्तिभागवतस्यैते मया निखिलं भूमिपते विधानमुक्तम् ॥ त्वमपि श्रवणादि तस्य कुर्याः सह तेन वै यदा
त्यदानुकूल्यम् ३९ ॥ इति श्रीसत्संगिजीवने नारायणचरित्रे धर्मशास्त्रे चतुर्थप्रकरणे पुराणश्रवणो
त्सवे श्रीमद्भागवतपुरश्चरणविधिनिरूपणनामाऽष्टमोऽध्यायः ॥ ८ ॥ सुव्रत उवाच ॥ इति श्रुत्वा भगव
तो वाक्यं राजसत्तमः ॥ प्रहृष्टमानसो भूपस्त्वनाम तमीश्वरम् ॥ १ ॥ देशकालानुकूल्येन च पुरश्चर्यां द्वि
जोत्तमैः ॥ स्वयमेव कारयितुं श्रीमद्भागवतस्य सः ॥ २ ॥ ततः स भगवांस्तत्र कारयामास मंडपम् ॥ विचि
त्रवर्णैर्वसनै रंभास्तंभैश्च शोभितम् ॥ ३ ॥ ततो द्वितीये दिवसे विधाय प्रातराह्निकम् ॥ तस्मिन्व्यासास
नं रम्यं कारयामास मंडपे ॥ ४ ॥ पौराणिकं समाहूय पूर्वोक्तविधिनैव तम् ॥ उपवेश्यासने चार्चत्पुस्तका ॥ २७ ॥

र्चनपूर्वकम् ॥ ५ ॥ तस्मै वासांसि तूलानि च कौसुंभान्यानि स प्रभुः ॥ कौशेयानि च सूक्ष्माणि प्रारंभसमये ददौ
॥ ६ ॥ कुंडले करके हैमे सारा हैमोर्मिका शुभाः ॥ ततः पुराणप्रारंभं कारयामास स प्रभुः ॥ ७ ॥ राम
प्रतापेच्छारामौ हरेरिति कथासने ॥ निषेदतुरुभौ बंधू श्रोतृधर्मस्थितौ नृप ॥ ८ ॥ यथोचितं सभायां च
निषेदुस्तत्र पार्षदाः ॥ तत्तमब्रमुखा नृपा मुकुंदाद्याश्च वर्णिनः ॥ ९ ॥ मुक्तानंदादयश्च मुनयो निषेदुस्तत्र
संसदि ॥ जयारमादयो योषा निषेदुः स्त्रीकतोऽखिला ॥ १० ॥ सर्वेऽपि तत्र श्रोतारः सात्विकैर्लक्षणैर्युताः
आसन्सुशिक्षितास्ते वै प्रागेव हरिणा निजाः ॥ ११ ॥ सर्वज्ञोऽपि हरिस्तत्र नृनाट्यमनुशीलयन् ॥ शुश्राव तत्
र वक्त्रात्स्वयं धर्मप्रवर्तकः ॥ १२ ॥ अध्यायभागकठिनं तत्सम्यगनुवेदनः ॥ क्वचित्क्वचिद्विराट्प्रश्नं
क्त्रश्रोतृन्मुदा ॥ १३ ॥ कथांते कीर्तनं कृत्वा श्रोतृभिः सह स प्रभुः ॥ नाम्नो भगवतोऽध्याहृतेपौरा
णिकमुत्तमम् ॥ १४ ॥ अस्माकमेव द्विवाणि गोदाद्यामान्यं वैपितत्वया ॥ गृहीत्वा द्विजश्रेष्ठ पूर्वं नापितज्ञा
कैरा ॥ १५ ॥ नित्यं च जडकाद्येव यथेष्टं भोजनं त्वया ॥ कर्तव्यं हि श्रमो यस्मात्कर्तव्योऽस्ति तवानवरम् ॥ १६
॥ प्रातः कर्तुं पयःपानं धेनुं दुग्धां गृहाण च ॥ इत्युक्त्वा स पयस्विन्यौ धेनू तस्मै ददावुभे ॥ १७ ॥ ततः पौ
राणिकः प्राह स्वामिन्याजातेनवान्वहम् ॥ एवमेव कृपा नाथ पाजप्येन संशयः ॥ १८ ॥ किंचिद्विज्ञजन

॥स.जी.प्र.५ सामग्र्या आनुकूल्यं मे वेदाद्दि नरानुसम्प्रगान्तायाः पालनेस्मात्तव प्रभो ॥१९॥ तदांतिकस्थं संप्राह प्रह अ.०९॥
॥२९॥ सन्नृतमालिकम् ॥ अपेक्षितं त्वया शाकं निर्मितं देयमिति प्रभुः ॥२०॥ तदा स ब्राह्मणो हृष्टो जातं जातं प्रभो
र्द्विजम् ॥ वदन्नित्थं नमानस्स जगाम स्वालयं ततः ॥२१॥ कथां स प्रत्यहं शृण्वन्भक्तानानंदयन्हरिः ॥ स
मासे श्रीभागवते प्रागुक्तम करोद्विधिम् ॥२२॥ चक्रुर्दाने वाचकाय हेममुद्रा वरोत्तमाः ॥ स्वर्णं स्वस्य हरी
भूतमुत्तं च वैतवविधिं विभौ ॥२३॥ कृतं भगवता तेन सन्मानं वाचकस्य तु ॥ श्रुत्वाऽपुनर्वै समयं सर्वे नु विन्
पतयोऽपि च ॥२४॥ अन्यानपि द्विजांस्तत्र समायातान्स ईश्वरः ॥ कामवर्षीव पर्जन्यो दक्षिणाभिरतोषय
त् ॥२५॥ श्रीमद्भागवतं श्रुत्वा मासेनैकेन स प्रभुः ॥ शुश्राव दशमं स्कंधं पंचमं च विशेषतः ॥२६॥ मासद्व
येनैतौ श्रुत्वा ततः फाल्गुनमासि सः ॥ संभारेणैव महता चक्रे दोलोत्सवं हरिः ॥२७॥ ततः स भगवद्गी
तां भाष्योपेतां नृपाशृणोत् ॥ तावच्चैत्र नवमी प्राप्ता चैत्रशुक्लाऽतिपावनी ॥२८॥ महद्भिरेव संभारैरुत्सवं
प्रीतये प्रभोः ॥ उत्तमः कारयामास रामजन्मिक पर्वांतरे ॥२९॥
३०॥ समाप्तेऽथोत्सवे तस्मिन्स्व स्वदेशान्गते प्रभुः ॥ भक्ता
न्स्वस्याग्रेच पुनः कथारंभमचीकरत् ॥३१॥ विष्णोः सहस्रनामाख्यस्तोत्रं भाष्योपबृंहितम् ॥ शुश्रावाऽथ ॥२९॥

त्रयोदश्यां कृष्णायां तत्समापयत् ॥३२॥ वैशाखस्य प्रतिपदि कूर्मजन्ममहोत्सवम् ॥ कृत्वा पुनर्द्वितीयायां
कथारंभमचीकरत् ॥३३॥ अक्षोदं वैशवं वैवर्त्तं स्थं शुश्राव सकलं मुदा ॥ श्रीवासुदेवमाहात्म्यं मासेनैकेन
स प्रभुः ॥३४॥ आरभ्य द्वितीयातो मासेनैकेन सांघ्रिणा ॥ शुश्राव सामवेदस्य पारायणममसौ हरिः ॥३५
॥ ज्येष्ठशुक्लदशम्यां स कृत्वा गंगार्चनोत्सवम् ॥ मध्याह्न्याः पत्रल्लेऽस्मिन्समापनमकारयेत् ॥३६॥ एका
दश्यां निर्जलायां प्रारभ्यमितास्क्षराम् ॥ श्रावणे त्वं चनभः शुक्लतृतीयायां समापयत् ॥३७॥ चतुर्थ्यां श्राव
णस्य प्रादुर्भावमहोत्सवम् ॥ कृत्वा मध्याह्नसमये साधून्विप्रानभोजयत् ॥३८॥ ततश्च नागपंचम्यां नयं
वैदुरिकं हरिः ॥ श्रोतुमारंभयामास भक्तानानंदयन्नृप ॥३९॥ श्रावण्यां पौर्णमास्यां तेर रक्षाबंधोत्तरं हरिः
॥ समापयत्स्वतां शोलो पयामास वाचकम् ॥४०॥ इत्थं श्रीवासुदेवो निजजननयनानंदपूर्णेंदुवक्त्रो ॥
मानुष्यं नाट्यन्स्वं स कलमपि भुवि स्थापयन्नेव धर्मम् ॥ सीयानां हृष्टस्मिः कलिबलमहितं दुर्जयं चाप्य
धर्मं भूजादुत्सारयंस्त्राप्रयतमुनिगुरुः स्वामिनारायणाख्यः ॥४१॥ इति श्रीसत्संगिजीवने नारायणच
रित्रे धर्मशास्त्रे पञ्चमप्रकरणे पुराणश्रवणोत्सवे श्रीमद्भागवतादि सच्छास्त्र श्रवण वाचक सन्मानानि
रूपण नामा नवमोऽध्यायः ॥ ९ ॥ कृत्वतत्रवाच ॥ पौराणिकं प्रापयित्वा गीतवाद्युपुरःसरम् ॥ तद्गृहे सप्त

 पुरे शो निर्बाधस्तादृशाविशन् ॥२॥ तत्राजगाम तावत्तु सारंगपुरभूपतिः ॥ जीववर्मा च तत्पुत्री देविकाऽ 
 स्याः रदव्रता ॥३॥ स्वरवीरस्तथा रागे माजलासुतयासह ॥ तत्रागच्छच्च पुंनाम्यो भक्तो भगवतो महान् ॥ उ
॥ प्रणाम्य भगवन्तं ते मानितास्तेन सादरम् ॥ निषेदुस्तत्पुरतस्तद्दर्शनमहामुदः ॥४॥ संपृष्टाः स्वागतं
तेन प्रभुणा विनयानताः ॥ तऊचुस्तं नमस्कृत्य बद्धांजलिपुटा वचः ॥५॥ भगवन्भवबंधघ्नत्वद्भक्ता
वयमीश्वर ॥ नेतुं सारंगनगरे त्वामत्र समुपागताः ॥६॥ आर्तैरस्मैरपि वा भक्तैर्विशेषो नास्ति ते कि
ल ॥ समदृष्टेर्निरंशस्य ततोऽस्मासु दयास्तु ते ॥७॥ जन्माष्टम्युत्सवं नाथ पुरे नः कर्तुमर्हसि ॥ अस्माकं यु
द्धनं किंचित्तत्ते वै वाऽस्ति निश्चितम् ॥८॥ एतावद्याचितं स्वामिन्नस्माकं भक्तवत्सल ॥ दातुमर्हसि नाथ त्वं
वयं हि त्वच्छरणागताः ॥९॥ इति तैः प्रार्थितः स्वामी तान्निरूप्य दयान्वितः सः ॥ जानन्नुवाच भो भक्तास्तत्राऽऽ
यास्यामि निश्चितम् ॥१०॥ कुरुतोत्सवसंभारान् यूयं गत्वाऽग्रतोऽनघाः ॥ पंचम्यामागमिष्यामि तत्राऽहं ना
त्र संशयः ॥११॥ इति वाक्यं प्रभोः श्रुत्वा तेऽतिसंहृष्टमानसाः ॥ प्रोचुस्तं भगवद्भक्ता रागं तत्र सहाऽखिलैः
१२ ॥ तथेत्युक्ते भगवता जीववर्मा तमन्वयम् ॥ आमंत्रयामास भक्तानपरांश्चागमापसः ॥१३॥ ततस्तद्दे
वस्वपुरं गंतुकामं समुत्सुकम् ॥ उत्तमो जीववर्माणं रागादींश्चाप्यभोजयत् ॥१४॥ भुक्त्वा ते स्वपुरं गत्वा सं 

भारं चक्रुरादरात् ॥ अन्नोदपात्रास्तरणकाष्ठशाकघृतादिकान् ॥१५॥ भगवानपि पंचम्यामुत्तमेन च
पार्षदैः ॥ भक्तैश्चान्यैः परिवृतस्तत्पुरं प्रययौ ततः ॥१६॥ समारूढो वाहं जविनमरुणं मंजुलाकृतिं दध
द्वौ वामे करकमलकोशेऽसिं मृदुले ॥ परवेत्रं चैशः शिरसि सकलजना माः परिवृतो हयारूढैः सोमप्रभु
खनिजभक्तैश्च समययौ ॥१७॥ रामप्रतापी वडवां समारुह्य श्रुकैसरीम् ॥ तमन्वगाऽऽदिहिताश्च मिच्छाराम्मा
ऽपि कृत्यूच्च ॥१८॥ तथा परमादपोषो याचपूज्यात्मानमिवतम् ॥ यातरं हृदि वायपुरस्तत्त्रिरश्विति नेतांकितः ॥१९
॥ श्रुत्वाऽऽयातं हरिं राजन् सारंगपुरवासिनः ॥ गीतवादित्रनिर्घोषैस्तत्सन्मुखमुपाययुः ॥२०॥ हरारद्ध
हरिं प्रेमात्स्वं वदेश्च वरवते ॥ प्रणेमुर्दंडवद्भक्त्या ततोऽभिमुखमभ्यवन् ॥२१॥ संमाप्य तामथायोग्यं सा
कं तैर्भगवान्पुरम् ॥ प्रविश्य वासमकरोज्जीववर्माजये हरिः ॥२२॥ रागादयो निवासा यथायोग्यं च शाऽदि
शास्त्रियः ॥ अन्येऽप्यपि यथायोग्यं वासस्थानान्यदापयत् ॥२३॥ जीववर्मा च पौराश्च हरिं नागवतां च स्वतान्
॥ यथोचितेनातिथ्येन तोषयामासुरुत्सुकाः ॥२४॥ गृहिणीं स्वाजिनीं चापि तत्र पृथ्वा निनूरिशा ॥ देशांत
रेभ्य आजग्मुः पौरास्तान्निन्यवासयन् ॥२५॥ भगवद्दर्शनं कृत्वा सर्वे ते परमां मुदम् ॥ लेभिरे सोऽपि तान्
सर्वान्यथोचितमपानयत् ॥२६॥ तत्पुरे हरिभक्तानां पृथैः पुंसां च योषिताम् ॥ तपस्विनां मुनीनां च बभूवा

॥ स॰जी॰च॰ ॥ तीव संकुलम् ॥ २७ ॥ ततः कृष्णोत्सवान्तरां धवलापालतावधि ॥ कारयामास सभां वितानैव सुधा ॥ अ॰ १० ॥
॥ २० ॥ तले ॥ २८ ॥ उच्चं सिंहासनं तत्र स तस्मान्निशि सत्प्रभुः ॥ आगत्यारुरोहाथ भक्ता निषेदुस्तस्य चाग्रतः ॥ २९
तत्र ज्ञानतपोवृद्धा मुनयः पुरतः प्रभोः ॥ निषेदुः पृष्ठतस्तेषां वर्णिनो कृशास्तपस्विनः ॥ ३० ॥ तेषां च पृष्ठतः
सर्वे मुनयस्तरुणास्तथा ॥ तेषां पृष्ठे किशोराश्च निषेदुर्मुनयोऽखिलाः ॥ ३१ ॥ रामप्रतापस्तस्यैव पुरतः सा
नुजः प्रभोः ॥ सिंहासनं चाविकम्प्य पीठस्थो वरजन्मने ॥ ३२ ॥ प्रभोश्च दक्षिणे भागे शास्त्रज्ञानतपोधिकाः
॥ विप्रा निषेदुस्तस्याद्वयो वृद्धा द्विजातयः ॥ ३३ ॥ वामभागे न भगवतः सोमाद्या मुख्यपार्षदाः ॥ नि
षेदुः पृष्ठतस्तेषां जीवधर्मादयो नृपाः ॥ ३४ ॥ मुकुन्दानंदमुख्याश्च नैष्ठिकब्रह्मचारिणः ॥ प्रीतेः सिंहास
नस्यैव तस्थुस्तस्यैव तेरताः ॥ ३५ ॥ रघुजिन्मांजनीमाद्याः क्षत्रियाः शस्त्रपाणयः ॥ तस्थुर्भगवतः पश्चा
त्सर्वतः प्रसरद्दृशः ॥ ३६ ॥ मुनीनां पार्षदानां च मध्ये ये ब्रह्मचारिणः ॥ निषेदुर्वास्कदेवाद्या नैष्ठिकं व्र
तमाश्रिताः ॥ ३७ ॥ स्वस्तिकासनमेवैकमाश्रित्यैते ऽखिलाश्च ये ॥ अकुर्वतोऽगचापल्यं निषेदुस्तत्र सं
सदि ॥ ३८ ॥ एतेषामथ सर्वेषां पृष्ठतः क्षत्रजातयः ॥ उपाविशंश्च तत्पश्चाद्भक्ता भगवतो विशाः ॥ ३९ ॥ ते
षां च पृष्ठतः शूद्रास्तत्पश्चादपरे जनाः ॥ मर्यादया निषेदुस्ते तदेकार्पितदृष्टयः ॥ ४० ॥ स्त्रीणां वृन्दानि ॥ २० ॥

हरेश्च तस्य मर्यादयैव हि ॥ निषेदुर्वीक्षमाणानि प्रभुं सिंहासनस्थितम् ॥ ४१ ॥ तेषूपविष्टेष्वखिलेषु राजन्
न्नित्यं सभायां निजसंस्थितेषु ॥ आनन्दपूर्णस्तीनमूलाप्रमानं वचो जगादेत्यृषिः पुराणः ॥ ४२ ॥ इति
श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे चतुर्थप्रकरणे सारंगपुरे जन्माष्टम्युत्सवे भगवतः स
भाप्रवेशनिरूपणनामा दशमोऽध्यायः ॥ १० ॥ श्रीनारायणमुनिरुवाच ॥ सर्वे शृणुत मो भक्ता मम वा
क्यं हितावहम् ॥ अस्ति जन्मतिथिः साक्षाद्वासुदेवस्य विश्रुता ॥ १ ॥ तस्मात्तद्व्रतं प्रकर्त्तव्यं सर्वैरेव मदा
श्रितैः ॥ श्रीकृष्णोऽस्ति यथाऽस्माकमिष्टस्तेषामपि तादृशी ॥ २ ॥ विधानमस्याः सकलं यथाशास्त्रं च वीजनाः
॥ कथयामि तदाश्रुत्य कर्त्तव्यं तद्व्रतं तथा ॥ ३ ॥ सप्तमीवेधरहिता रोहिणीबुधसंयुता ॥ निशीथयोगाष्टमी
या सा कृष्णजन्माष्टमी मता ॥ ४ ॥ अष्टमी रोहिणीयुक्ता निशीथे यत्र दृश्यते ॥ मुख्यः कालः स विज्ञेयस्त
त्र जातो यतो हरिः ॥ ५ ॥ जन्माष्टमीव्रतस्यास्य निर्णये च बहवो द्विजाः ॥ विवदन्ते हि विद्वांसः स्वस्वमतस्थापनो
द्यताः ॥ ६ ॥ जन्माष्टमीं जयन्तीं च व्रतं द्वे इति केचन ॥ एकमेवेति केचित्तु विद्वांसः कथयन्ति हि ॥ ७ ॥ कृष्ण
जन्मनिशामेव जयन्तीं केचिदूचिरे ॥ अष्टमीरोहिणीयोगं जयन्त्याख्यां तु केचन ॥ ८ ॥ उदये चाष्टमीं केचित्
द्विसप्तेरुदयं बुधाः ॥ केचिद्वदन्ति केचिच्च सूर्यस्यैवोदयं द्विजाः ॥ ९ ॥ तिथ्यन्तपारणापक्षं गृहीत्वा केऽपि

॥स॰जी॰च॰ वादिन ॥ अष्टमी सप्तमीविद्धा यत्रास्ति तिव्रते किज ॥१०॥ गृहीत्वा पारणा पक्षमृक्षसवोते: पके चन ॥ ना अ॰२१॥
॥२१॥ डिपंते पूर्वे युक्तां माशास्त्रां न्नवमीयुते: ॥११॥ सूर्योदयस्य संबंधमुपवासति येजगुः ॥ मुख्यं केचि
च्च केचित्तु कर्मकाले विचक्षणाः ॥१२॥ नाडिपंते हिनाः केचिद्दिशां मुदाचवा ऽष्टमीम् ॥ आजेन्म रोहि
णीमेव विद्वांसः कुर्वते व्रतम् ॥१३॥ इत्यादयो बहुविधा वादाः संत्य ऽत्र हि व्रते ॥ अवलंब्यार्षवाक्यानि
विद्वद्भिर्ग्रथिता स्मृते ॥१४॥ सप्रमाणाः इति सर्वे ते बुध्वात्रेह सुनिश्चितम् ॥ तस्त्वं प्रदर्शयाम्य द्यसर्वसंशा
यनुत्तये ॥१५॥ यदा पूर्व दिने त्वष्टवरोहिणी बुधसंयुता ॥ निशीथगाष्टमी सम्यक् नोत्तरा तु निशीथगा ॥
१६॥ तदा विद्धा ऽपि सप्तम्या गृहीतव्या ऽष्टमी व्रते ॥ परेद्युः पारणा कार्या तिथ्यंते व्रतचारिभिः ॥१७॥ प्रोक्ता
योगविद्धा वेला सप्तमी सहिताष्टमी ॥ आत्तौ त्वग्नि पुराणादौ नान्यथा केवलाष्टमी ॥१८॥ पूर्वेद्युरेव योग
श्चभागुक्तः सकलो यदि ॥ नवेदथ परेद्युस्तु निशीथे केवलाष्टमी ॥१९॥ उपवासद्वयं कुर्यात्तदाशक्तः
स्तु पुरुषः ॥ उपवासमशक्तस्तु कुर्यादेकं परेऽहनि ॥२०॥ बुधाष्टमी रोहिणीनां निशीथे गमं तरा ॥ पूर्वविद्
द्धान कर्तव्या बुधे जन्माष्टमी क्वचित् ॥२१॥ बुधवारेण चेन्ना ऽर्हरोहिणी सहितामपि ॥ पूर्वविद्धां विहायैव च
श्च दाग्रात्या ऽष्टमीमता ॥२२॥ विनाऽर्क्षेणापि कार्या नवमी संयुताऽष्टमी ॥ सऋक्षापि न कर्तव्या सप्तमी ॥२१॥

संयुताष्टमी ॥२३॥ पलैकघटी मुहूर्तं वा यदा स्यादष्टमी ततः ॥ नवमी सैव ग्राह्या स्यात्सप्तमी संयुता न
तु ॥२४॥ विद्धाया अस्तु पः स्याच्चेत्सप्तमी संयुताष्टमी ॥ तदा परा गृहीतव्या व्रते जन्मतिथिः प्रभोः ॥२५
॥ शुद्धाऽधिकाष्टमी यर्हि तदापि नवमी युतेः ॥ प्राशस्त्या दुत्तराग्राह्येति सूचुः केचन वैष्णवाः ॥२६॥ बहुका
लव्यापकत्वाद्विधा नाचात्तु सर्वथा ॥ पूर्वा ग्राह्येति गोस्वामिमतं तत्राग्रमस्ति नः ॥२७॥ इति संक्षेपतो ह्यु
प सर्वसारो निरूपितः ॥ आश्विन्येन मतं ह्येषो जन्माष्टम्यास्तु निर्णयः ॥२८॥ व्रतं करिष्यन्पुरुषः सप्त
म्यां लघुभुग्भवेत् ॥ जितेंद्रियः स्वपेद्रात्रौ स्मरन्मेव विचिंतयन् ॥२९॥ ब्राह्मे मुहूर्ते उत्थाय कृत्वा नित्यविधि
ततः ॥ मध्याह्ने च नदीं गत्वा विधिना स्नानमाचरेत् ॥३०॥ कृत्वा ऽपामार्गसमिधा दंतधावनमादितः ॥ ति
लामलककल्केन स्नापान्मृत्स्नानपूर्वकम् ॥३१॥ ततो माध्याह्निकं कृत्वा गृहमेत्य शुचिर्व्रती ॥ मंडपं का
रयेद्रम्यं कदलीस्तंभशोभितम् ॥३२॥ विचित्रवस्त्रैः पुष्पैश्च मंडितं चाम्रपल्लवैः ॥ कुंभैर्नानाविधैरंगैस्त
थैव सुविचित्रितम् ॥३३॥ सितैः पीतैस्तथा रक्तैः कर्बुरैर्हरितैरपि ॥ वासोभिः शोभितं कुर्यात्संमतानां कद
लीनां दलैः ॥३४॥ पत्रैः फलैस्तथा कै अश्वरीपालिभिरितस्ततः ॥ पुष्पमालाविचित्रं च चंदनागुरुधूपितम् ॥३५॥ त
न्मध्ये सूतिकागारं देवक्या विरचीतन ॥ धात्री कुर्यात्तत्र चैकां नालच्छेदनकर्तरीम् ॥३६॥ तन्मध्ये मंच के

रम्यं स्थापयेद्देवकीं ततः॥ तद्वत्संगे बालकृष्णं स्थापयेत्तु स्तनंधयम्॥३७॥ यशोदां तत्र चैकस्मिन्प्र 
देशे सूतिकागृहे॥ स्थापयेत्तां कुर्वीत तद्वत्सुतवरकन्यकाम्॥३८॥ नंदश्च वसुदेवश्च गोपा गोप्यश्च धे
नवः॥ बालक्रीडा च कृष्णस्य तत्र कार्या यथोचितम्॥३९॥ रोहिणी बलदेवश्च षष्ठीदेवी वसुंधरा॥ ब्रह्मा
च रोहिणीऋक्षं तथा कृष्णाष्टमी तिथिः॥४०॥ मार्कंडेयो बलिर्व्यासो हनूमांश्च विभीषणः॥ कृपः परशु
रामश्च सप्तैते चिरजीविनः॥४१॥ नृत्यंतस्त्वप्सरोवृंदैर्गंधर्वा गीततत्पराः॥ लेखनीयाश्च तत्रैव कालि
योपमुनाह्रदे॥४२॥ इत्येवमादि यत्किंचिद्रूपा शक्ति यथामति॥ लेखयित्वा प्रयत्नेन पूजयेद्भक्ति
तत्परः॥४३॥ यथाशक्ति प्रकर्त्तव्याः कृष्णादीनां सुमूर्त्तयः॥ सौवर्णाद्यास्तत्पूजा कर्त्तव्या निशि भक्तितः
॥४४॥ उपहारैर्यथालब्धैः शुद्धैः श्रीकृष्णमर्चयेत्॥ सहांगदेवतं मंत्रैर्व्रतयं यो दितैः पुमान्॥४५॥ दे
वक्यादियुतं कृष्णं गीतवाद्यसमन्वितम्॥ संपूज्य विधिना भक्तः पार्षदांस्तस्य चार्चयेत्॥४६॥ संपूज्य
सर्वदेवांश्च प्रणम्य देवमच्युतम्॥ ब्राह्मणान्पूजयित्वाथ तेभ्यो दद्याच्च दक्षिणाम्॥४७॥ ततो मुहूर्त्ते दोला
यां बालकृष्णं तमादरात्॥ संपूज्य नीराजयित्वा शनैर्दोलयेत्पुमान्॥४८॥ कथां च जन्माध्यायोक्तां शृणु
याद्भक्तिभावतः॥ ततः कुशासने स्थित्वा कुर्याज्जागरणं व्रती॥४९॥ प्रातः कुर्यान्मूर्तिदानं कृत्वैवोत्तर 

पूजनम्॥ ब्राह्मणान्भोजयित्वाऽथ स्वयं कुर्वीत पारणम्॥५०॥ सर्वेष्वेवोपवासेषु दिवा पारणमिष्य
ते॥ नरात्रौ पारणं कुर्याद्दास्यात्पंचामृते हरेः॥५१॥ एतेनैव विधानेन प्रतिमासेऽत्र यः पुमान्॥ कृष्णा
ष्टमीव्रतं कुर्यात्प्राप्नुयात्स वांछितं हरेः॥५२॥ एवं संवत्सरे पूर्णे व्रतं कृत्वा जितेंद्रियः॥ महापूजां विधा
यांते दद्याच्छय्यां च गाः पुमान्॥५३॥ आदावंतेऽथवा मध्ये कुर्यादुद्यापनं व्रती॥ तेन स्यात्सांगं व्रतं सर्वा
न्कामान्फलति निश्चितम्॥५४॥ वार्षिकं तु व्रतं कार्यं प्रतिवर्षं यथाविधि॥ कृष्णः प्रसन्नो भवति व्रतिभ्य
स्तेन निश्चितम्॥५५॥ उद्यापनं व्रतस्याऽस्य कथयामि समासतः॥ मंडलं सर्वतोभद्रं कर्त्तव्यं मंडपोत्तमे
॥५६॥ तस्योपरि प्रतिष्ठाप्य ताम्रकुंभं जलान्वितम्॥ वेष्टयेच्छ्वेतवस्त्रेण नरत्नसमन्वितम्॥५७॥ पंच
पल्लवसंयुक्तं पूर्णपात्रसमन्वितम्॥ कार्यः सुवर्णेनैकेन देवकीसहितो हरिः॥५८॥ अत्राप्युक्तस्तु तद
दिने कुर्यात्प्रतिकृतिं हरेः॥ रोहिण्या सहितं चेंदुं रौप्यं कृत्वार्चयेद्व्रती॥५९॥ चतुर्विंशतिसंख्याकाः स्वा
जीः पायससंभृताः॥ निवेदयित्वा हरये दद्याद्विप्रेभ्य एव ताः॥६०॥ दीपमाला घृतेनैव कर्त्तव्या हरिमंदि
रे॥ होमः पुरुषसूक्तेन कार्यो नाममंत्रतः॥६१॥ चतुर्विंशतिसंख्याकान्ब्राह्मणान्भोजयेत्ततः॥
यथाशक्त्यर्चयेत्तांश्च गंधवस्त्रविभूषणैः॥६२॥ सोपस्करं ताम्रकुंभं स्कवर्णं गाश्च शक्तितः॥ यथावि

 पितृश्राद्धे तथा मोदयाभ्यन्त्री कृष्णतुष्टये ॥६३॥ घृतपात्रं तिलपात्रं मुद्रिकां च कमंडलुम् ॥ उपानहौ च व 
 स्त्राणि शय्यां दद्याद्द्विजोत्तमः ॥६४॥ आदेहदानेन तथा होमेनैव यथाव्रतेषु च ॥ वित्तशाठ्यं न कुर्वीत
यदीच्छेद्विपुलं धनम् ॥६५॥ पात्रेषु धर्मकार्येषु वित्तशाठ्यं करोति यः ॥ सर्वधर्मविनिर्मुक्तो नरके स
निमज्जति ॥६६॥ सर्वव्रतेषु समाप्तावेतत्स्वर्गादयो यमाः ॥ पालनीयाः प्रयत्नेन स्त्रीभिः पुंभिश्च सर्वशः
॥६७॥ व्रतं प्रोक्तमिदं पुण्यं श्रीहरेर्मधुराध्रुवः ॥ कामदं रुक्मिणीभर्तुः सर्वेषां द्वारिकापतेः ॥६८॥ श्री
कृष्णजन्मदिवसे पश्चभुक्तेन राधमः ॥ समं वेन्मातृगामी च ब्रह्महत्यां जनेत्त्व ॥६९॥ उपवासासम
र्थश्चेत्फलाहारादिना व्रतम् ॥ यथाशक्ति प्रकुर्वीत परयेन्नत्विदं क्वचित् ॥७०॥ इति तेऽभिहितो मया भक्ता
पुण्यं त्वंहि समासतः ॥ जन्माष्टमीव्रतविधिः कर्तव्यो यो महाद्भिते ॥७१॥ य इदं संश्रृणुयान्नत्वा पठेद्वा
पि समाहितः ॥ पुमान्सोपि व्रतं फलं प्राप्नुयान्नात्र संशयः ॥७२॥ सुव्रत उवाच ॥ इत्यादिश्य निजान्भक्ता
न्हृष्टैस्तैः सर्वैर्हितः ॥ स्वावासं तु नरनारायणसूनोस्तत्र स्थानं प्रपूर्णनाः ॥७३॥ सांध्यं विधिं तत्र विधाय सर्वे श्री
कृष्णनामानि पठन्मुखेन ॥ समास्त तां यामभुवि मध्ययामं स सुष्वाप निशां नरेंद्र ॥७४॥ इति श्रीस
त्संगिजीवने नारायणचरित्रे धर्मशास्त्रे चतुर्थप्रकरणे सारंगपुरे जन्माष्टम्युत्सवे व्रतविधिनिरूपणो 

नामैकविंशोऽध्यायः ॥२१॥ सुव्रत उवाच ॥ अथ प्रत्युत्थाय भगवान्प्रात्याह्निकं नृप ॥ कृत्वा च कारया
याय समर्चनमहोत्सवम् ॥१॥ उद्धवस्वामिनः पूजां समाप्याऽपि च वर्णिन ॥ ततः स मंडपं रम्यं बंधया
मास पार्षदैः ॥२॥ विचित्रवस्त्रशोभाढ्यं कदलीस्तंभमंडितं ॥ तस्मिंश्च देवतापीठं कारयामास शो
भनम् ॥३॥ सर्वैर्भक्तजनैः सार्कं निराहारः सतद्दिने ॥ प्रतिमां कारयामास हैमीः पूजयितुं निशि ॥४॥ दि
नेतु सकलं निन्ये कृष्णकीर्तनगायनैः ॥ निशि स्नात्वा महापूजां पूर्वोक्तविधिनाऽकरोत् ॥५॥ कृष्णं
च देवकीनंदं यशोदां चाथ्र देवताः ॥ पंचामृतेन संस्नाप्य सोऽभ्यषिंचत्सदंबुभिः ॥६॥ महाभिषेकं
कृत्वैवं वसनैर्वस्त्रभूषणैः ॥ सुगंधिना चंदनेन कौंकुमेनाक्षतैः शुभैः ॥७॥ नानाविधैः सुरभिः पुष्पै
श्च तुलसीदलैः ॥ कृष्णं पाबिल्वपत्रैश्च पूजयामास केशवः ॥८॥ उच्चारयन्नाममंत्रं प्रतिपत्रं स देवमव
म् ॥ कृष्णमानर्च रुचिरैः सहस्रतुलसीदलैः ॥९॥ धूपं दीपं ततः कृत्वा नैवेद्यं सचतुर्विधम् ॥ समर्प्य
फलतांबूलदक्षिणाभिरपूजयत् ॥१०॥ महानीराजनं कृत्वा दत्वा पुष्पांजलिं ततः ॥ नत्वाऽभ्यर्च्या ब्रा
ह्मणांश्च सपूर्णां तां समापयत् ॥११॥ कृष्णमांदोलयन्प्रेंखेन जन्मचरितं स च ॥ श्रृण्वन्भागवतप्रो
क्तं निनाय रजनीं तु ताम् ॥१२॥ प्रातः पुनर्नित्यकृत्यं विधायोत्तरपूजनम् ॥ कृत्वा मूर्तीर्ब्राह्मणाय दत्वा

॥स॰जी॰च॰ विप्रानभोजयत ॥१३॥ संवत्सरपारणं कर्तुमीदृशानेभ्य आत्मनः ॥ भक्तेभ्यो दर्शनं दत्वा ततश्चक्रे स प्र॰१२॥
॥२५॥ पारणम् ॥१४॥ अथ गढपुरे भागाञ्चनदीतीरे स्वके शोभने ॥ स्थितः परिवृतो भक्तैः सद्धर्मोत्सवानतिक्ष
यत ॥१५॥ प्रबोधिन्यां हरेरन्ते कैश्चिद्भक्तानां विदुषामपि ॥ उद्दिनसंज्ञायाश्चत्रपथ्यन्सपक्षोऽग्रमजम् ॥१६॥
सर्वेऽपि ते भक्तजनाः पूजयंति स्म सादरम् ॥ सितैः पीतैस्तथा रक्तैर्वस्त्रैर्हेममैर्विभूषणैः ॥१७॥ चंदनैः
पुष्पहारैश्च मुक्ताशेखरपंक्तिभिः ॥ उपहारैर्बहुविधैस्तं संपूज्य ववंदिरे ॥१८॥ पौराः सर्वेऽपि तं भक्त्या
सेवमाना अन्नजलानाम् ॥ प्रभुसंतोषयामासुः सम्प्रियोदे भवर्जिताः ॥१९॥ देशांतरीयाः शतशो जनास्तं
नक्तवज्जनम् ॥ मुनिभिः पार्षदैः सार्कं संभोजयितुमार्थयत ॥२०॥ ततस्तेषां स भगवान्पूर्णं कर्तुं मनो
रथम् ॥ रत्नं स्तत्यार्थनां रागं तं तदानीमन्वमोदत ॥२१॥ ततः क्रमेण धनिकाभक्तास्तं मुनिसह ॥ पार्षदा
रोश्वनक्तैर्वभोजयंति स्मतेऽन्वहम् ॥२२॥ एवं निवसतस्तस्य भक्तानंदनिधेर्हरेः ॥ यतीपावनो मासः
प्राप्ता च कृषिपंचमी ॥२३॥ स तर्षिपूजासहितं सत्तत्तुस्त्रीः कारयामास व्रतं नन्वसर्वाः ॥ तासां रजोदृष्टण
महज्जातं संशोधयन्मर्मचर्मणो दृढ ॥२४॥ इति श्रीसत्संगिजीवने नारायणचरित्रे धर्मशास्त्रे चतुर्थप्रक
रणे सारंगपुरे जन्माष्टम्युत्सवे व्रतनिरूपणनामा द्वादशोऽध्यायः ॥१२॥ सुव्रत उवाच ॥ अथ राधाष्टमी ॥२५॥

प्राप्ता तस्या हरुत्सवं च सधिकम् ॥ पूजयित्वोत्सवं चक्रे मध्याह्नेऽनृपते प्रभुः ॥१॥ भोजयित्वा ततो विप्रान्
भगवान्सहस्रशः ॥ भुक्त्वा भक्तजनैः सार्कमपीदत्सविचेतमे ॥२॥ तस्मिन्पुरे तदीक्षार्थं कापायनि-
वासिनः ॥ भक्तास्त प्रतिदिनं भाजनगमुश्च पुनर्वपुः ॥३॥ नित्यं ते प्रार्थयंति स्म स्वग्रामागमनाय तम् ॥ आ
गमिष्यामि वो ग्राममित्युवाच च तान्प्रभुः ॥४॥ एकस्मिन्नितः प्रभुं नेतुं स ग्रामे दृढनिश्चयाः ॥ तन्नाममुख्या
आगम्युस्तद्दिने तत्र पत्तने ॥५॥ सत्रवीरो वास्तुनानातसल्लीच मिताभिधा ॥ अन्यात तस्त्रीस्त्वमर्याख्या
मानश्रूरश्च तत्सुतः ॥६॥ वेजाख्यः स्वत्रियश्चापि मोवीरः कामश्च राघवः ॥ एते वैरूपास्तथैवैतेषां भगिनी
देविकाभिधा ॥७॥ कर्णोदेवारपश्चान्येऽनभक्ता भगवतोऽदसम् ॥ तत्रैसत्यार्थयामासुर्भगवन्नुग्राममे
हिनः ॥८॥ तेषां निष्कपटं भावं दृष्ट्वा च हरिः सतान् ॥ पूयं मदीयानो नक्ताग्रामो वोऽपि ममैवहि ॥९॥
युष्माकं प्रीतये तत्र सह मुन्यादिभिः किल ॥ आगमिष्याम्यहं मा तत्पूर्वं मदीयं गच्छत ॥१०॥ इत्युक्तास्ते
उतिसंरुष्टाजग्मुः स्वं ग्राममत्सुक्ताः ॥ तदर्थं पञ्चसाहित्संतच्चतैः प्रागुपार्जितम् ॥११॥ ततो नवम्यामम-
खिलैः परीतस्स्वभक्तसंघैर्हरिरप्ययासीत ॥ नमन्यमानास्त्रु कृत्वा कुलाष्टैः पौरैः सकार्यापनमा
पत्तीघ्रम् ॥१२॥ वाक्षित्रनिध्यानविनादिताशास्तं वास्तुमुख्या हरिमभ्युपेत्य ॥ भक्ताश्च सस्त्रीतनयाः प्र

एवम्प्रार्थनं पतिस्मतमात्मनाथम् ॥ २३ ॥ नासीर्गृहे स भगवान्तुंस्ततार स पार्षदः ॥ भक्तान मानय अ॰२३॥
यायोग्यमुदतारयदात्मनः ॥ २४ ॥ उत्सवो भूत्महांस्तेषां ग्रामस्यानां गृहे गृहे ॥ भक्तांस्तान्सेवमाना
नां तत्र निष्कपटात्मनाम् ॥ २५ ॥ ये ये भक्ता यत्र यत्र त्युत्तीर्णास्तत्र तत्र ते ॥ आसन गृहे ग्रागृहिणस्त्वा
गंतुकसमाविभुः ॥ २६ ॥ पत्नीभिः सह वास्तुस्त्रस्वगृहं परिच्छदम् ॥ समर्यहरये तस्मै स्वयमागंतुकी
यया ॥ २७ ॥ हरदे ग्रामथलोकेभ्यः पार्कदानात्तपाप्रनोः ॥ जैमिरेनाः चकार्ग्रं वेलत्कर्तुं ग्रामवासिनः ॥ २८
॥ एवं वसद्भगवांस्तत्र मुनिः सहसर्वत्राः ॥ आरभ्य भाद्रनवमीं प्रबोधन्युत्सवाविधि ॥ २९ ॥ स च तत्रापि नि
वसन्प्रसहं भक्तसंसदि ॥ दिव्यमासनमारूढः सद्वार्त्तां वकुरुत्रो करोत् ॥ ३० ॥ सतां धर्मान्विशेषेण यो
गं चाष्टांगमप्यसौ ॥ कथयामास सर्वं च ज्ञानमात्मपरात्मनोः ॥ ३१ ॥ श्रीमाण्डेलास हे वाग्सोग्रामसमत्रा
णितत्र च ॥ अपरास्थैः न्वेहेराजन् शुश्रावपरयामुदा ॥ ३२ ॥ रामानुजाचार्यकृतिं प्रत्रंसंस्तत्कथां हरि
ः ॥ तिथौ धनत्रयोदश्यां समापयाः यर्चं च वाचकम् ॥ ३३ ॥ दीपोत्सवं तलस्थके तत्र दुर्गपुरे यथा ॥ अ
न्नकूटोत्सवं चेशः प्रबोधन्युत्सवं तथा ॥ ३४ ॥ तथा निंचनून्भक्तजना स्त्रसर्वे च स्त्रेरनर्ध्येर्विविधैस्त्वं देवे
॥ विभूषणैश्चन्दन पुष्पहारैरापीरवर्यं श्रमहो पराभिः ॥ ३५ ॥ इति श्रीसत्संगिजीवने नारायणचरित्रे ॥२५॥

धर्मशास्त्रे चतुर्थप्रकरणे भगवतः कार्यायनग्रामे संस्थितिस्तूत्सवनिरूपणनामा त्रयोविंशो ऽध्यायः ॥
२३ ॥ सुव्रत उवाच ॥ प्रबोधन्यानि निर्गाहरिर्महत्यां भक्तसंसदि ॥ शुश्राव नागरैकुर्वन्प्रबोधन्याः कथा
नृप ॥ १ ॥ कथांतेन वकुधा च के सत्कर्माति प्रसंसनम् ॥ सीयानां निर्क्षणाये वस चासत्कर्मगर्हणम् ॥ २
तमुत मो नरपतिः प्रणम्य विनयान्वितः ॥ वद्धांजलिपुरो शास्त्री स्त्रश्रावसर वित्तदा ॥ ३ ॥ राजोवाच ॥
देहिनामत्र भगवन्प्रवृत्तिः कर्मसु ध्रुवम् ॥ सर्वेषां हृत्यते लोके व्यवहारक्रियात्मनाम् ॥ ४ स्वर्ग
माप्तिर्भवेत्र कर्मभिः क्रियावताम् ॥ नरकाप्तिर्भवेत्कैश्च तन्मे त्वं वक्तुमर्हसि ॥ ५ ॥ सुव्रत उवाच ॥
इति पृष्टो नरेन्द्रेण तेन बुद्धिमता प्रभुः ॥ द्विविधान्यपि कर्माणि शेवाच स फलानि सः ॥ ६ ॥ श्रीनारायण
मुनिरुवाच ॥ परदारानिहर्त्तारः परदाराभिमर्षिणः ॥ परदारप्रयोक्तारो येते निरयगामताः ॥ ७ ॥ ये
परस्वापहर्त्तारः परस्वानां च नाशकाः ॥ सूचकाश्च परेषां ये ते वै निरयगामताः ॥ ८ ॥ प्रपाणां च सभा
नां च संक्रमाणां च भूपते ॥ आगाराणां च भेत्तारो नरा निरयगामताः ॥ ९ ॥ अनाथां प्रमदां बालां वृद्धां
भीतां तपस्विनीम् ॥ वंचयंति नरा ये च ते वै निरयगामताः ॥ १० ॥ वृत्तिच्छेदं गृहच्छेदं दारच्छेदं च येन राः ॥
मित्रच्छेदं तथा कुर्युस्ते वै निरयगामताः ॥ ११ ॥ सूचकाः संधिभेत्तारः परवृत्त्युपजीवकाः ॥ अकृतज्ञा

॥स॰नी॰च॰ अमित्राणां ते वै निरयगामिनः ॥१२॥ पाषंडा दूषकाश्चैव समयानां च दूषकाः ॥ ये प्रत्यवसिताश्चैव अ॰१४॥
॥२६॥ ते वै नि॰ ॥१३॥ विषमव्यवहाराश्च विषमाश्चैव वृद्धिषु ॥ लाभेषु विषयाश्चैव ते वै नि॰ ॥१४॥ द्यूतसंव
वहाराश्च निष्परीक्षाश्च मानवाः ॥ प्राणिहिंसाप्रवृत्ताश्च ते वै नि॰ ॥१५॥ कृताशं कृतनिर्देशं कृतभ
क्तं कृतश्रमम् ॥ भेदैर्ये व्यपकर्षंति ते वै नि॰ ॥१६॥ पर्यश्नंति च ये दारानग्निभृत्यातिथींस्तथा ॥ उत्स
न्नपितृदेवेज्यास्ते वै नि॰ ॥१७॥ वेदविक्रयिणश्चैव वेदानां चैव दूषकाः ॥ वेदानां लेखकाश्चैव ते वै नि॰
॥१८॥ केशविक्रयका राजन्विषविक्रयकाश्च ये ॥ विकर्मनियेनीवंति ते वै नि॰ ॥१९॥ शस्त्रविक्रयका
श्चैव शस्त्राणां कर्तकास्तथा ॥ शल्यानां धनुषां चैव ते वै नि॰ ॥२०॥ शिलाभिः शंकुभिर्वापि श्वभ्रैर्वापि ती
क्ष्णकंटकैः ॥ ये मार्गमनुरुंधंति ते वै नि॰ ॥२१॥ उपाध्यायांश्च भृत्यांश्च भक्तांश्च निजसंस्थितान् ॥ ये त्य
जंत्यनिर्दोषांस्ते वै नि॰ ॥२२॥ अदांतदमकाश्चैव नासानां वेधकाश्च ये ॥ बंधकाश्च पशूनां ये ते वै नि॰
॥२३॥ अगोप्तारश्च राजानो बलिषड्भागतस्कराः ॥ समर्थाश्चाप्यदातारस्ते वै नि॰ ॥२४॥ क्षांतान्दांतां
स्तथा प्रतान्दीर्घकालं सहोषितान् ॥ त्यजंति कृतकृत्या ये ते वै नि ॥२५॥ एते वै निरयगाः प्रोक्ता नराः दु
ष्कृतकारिणः ॥ भागिनः स्वर्गलोकस्य ये तान्वक्ष्यामि नृपते ॥२६॥ दानेन तपसा चैव सत्येन प्रदपा ॥२६॥

पि च ॥ ये धर्ममनुवर्तंते ते नराः स्वर्गगामिनः ॥२७॥ शुश्रूषाभिस्तपोभिश्च विद्यामाः दापवापनैः ॥ ये
प्रतिग्रहनिःस्नेहास्ते न॰ ॥२८॥ भयात्त्रौनात्तथा क्रोधाद्दारिद्र्याद्व्याधिपर्षणात् ॥ सत्कृतं न विमुंचंति ते न॰
॥२९॥ क्षमावंतश्च धीराश्च धर्मकार्येषु चोत्थिताः ॥ मंगलाचारसंपन्नास्ते न॰ ॥३०॥ निवृत्ता मधुमांसे
भ्यः परदारेभ्य एव च ॥ निवृत्ता ये च मद्येभ्यस्ते न॰ ॥३१॥ आश्रमाणां च पातारः कुलस्य कर्मणां तथा ॥ दे
शानां च नगराणां च ते न॰ ॥३२॥ सर्वहिंसानिवृत्ताश्च नराः सर्वसहाश्च ये ॥ सर्वस्याश्रमभूताश्च ते न॰ ॥
३३॥ मातरं पितरं चैव शुश्रूषंति गुरूंश्च ये ॥ जितेंद्रिया मिताहारास्ते न॰ ॥३४॥ आराम्भवलं वैतन्वश्च यौ
वनस्थाऽप्यपीड्ये ॥ प्रवर्तंति निर्मदा निःसं ते न॰ ॥३५॥ अपराधेषु सस्नेहा मृदवो मृदुवत्सजाः ॥ आरा
धनसुखाश्चापि पुरुषाः स्वर्गगामिनः ॥३६॥ सहस्रपरिवेष्टारस्तथैव च सहस्रदाः ॥ त्रातारश्च सहस्रा
णां ते नराः स्वर्गगामिनः ॥३७॥ सुवर्णस्य च दातारो गवां च नृपसत्तम ॥ अन्नौ बुवाहनानां च ते न॰ ॥३८
॥ वैवाहिकानां द्रव्याणामन्नानां च यथोचितम् ॥ दातारो वाससां चैव पुरुषाः स्वर्गगामिनः ॥३९॥ वि
हाराः वसथोद्यानकूपारामसभाप्रपाः ॥ कारयंति स्वशक्त्या ये ते न॰ ॥४०॥ निवेशनानां क्षेत्राणां व
सतीनां च नृपते ॥ दातारः प्रार्थितानां च ते न॰ ॥४१॥ सर्वभूतदयावंतो विश्वास्याः सर्वजंतुषु ॥ सत्कृहिं

साम समाचारास्तेन०॥४२॥ परस्त्रीर्निर्ममा नित्यं परदारविवर्जिताः॥ धर्मेण ख्यात्व लोकारस्तेन०॥४३॥
मातृवत्स्वसृवच्चैव नित्यं दुहितृवच्च ये॥ परदारेषु वर्तंते तेन०॥४४॥ स्त्रैमार्ग्निवृताः सततं संतुष्टाः स्व
धनेन च॥ स्वभाग्यात्सुजीवंति तेन०॥४५॥ परदारेषु ये नित्यं चरिताः सृत्तलोचना॥ जितेंद्रियाः शील
परास्तेन०॥४६॥ सत्यश्लक्ष्णां वाणीं निर्गवा धां मधुरां दोषवर्जिताम्॥ स्वागतेनाभिभाषंते तेन०॥४७॥ प
रुषं येन भाषंते कटुकं न निष्ठुरं तथा॥ अपैशुन्यरताः संतस्तेन०॥४८॥ पिशुनां ये न भाषंते मित्रभेदक
रीं गिरम्॥ रूक्षं मैत्र्या सुभाषंते तेन०॥४९॥ ये वर्जयंति पारुष्यं परद्रोहं च मानवाः॥ सर्वभूतसमा दांताः
स्तेन०॥५०॥ न कोपाद्वाहरंते ये वाचं हृदयदारिणीम्॥ सांत्वं वदंत्यपि क्रुद्धास्तेन०॥५१॥ ग्रामे गृहे वा य
द्द्रव्यं पारक्यं विजने स्थितम्॥ नाभिनंदंति ये नित्यं तेन०॥५२॥ तथैव परदारान् ये कामवृत्तान् रहोगता
न्॥ मनसापि न हिंसंति तेन०॥५३॥ शत्रुमित्रे च ये नित्यं तुल्येन मनसा नराः॥ भजंति मैत्राः संगम्य तेन०
॥५४॥ श्रुतवंतो दयावंतः शुचयः सत्यसंगराः॥ स्वैरर्थैः परिसंतुष्टास्तेन०॥५५॥ श्रद्धावंतो मैत्रवंतस्त्वा
शास्त्रोक्तजनप्रियाः॥ धर्माधर्मविदो नित्यं तेन०॥५६॥ न्यायोपेता गुणोपेता देवद्विजपराः सदा॥ य
शोवितीर्योगपरास्तेन०॥५७॥ एवं सत्कर्मसंस्थायेन वंति पुरुषाः स्त्रः॥ स्वर्गं यांति त एवेति नानीहि



नृपसत्तम॥५८॥ सुव्रत उवाच॥ इत्याश्रुत्य ततो वाक्यं स राजा मुदितोऽनृप॥ अन्येऽपि भक्ताः सकलाः संहृष्टा
स्तं ववंदिरे॥५९॥ ततो द्वितीये दिवसे ब्राह्मणान् संस्मरन्नृपाः॥ भोजयामास नगरवांस्तद्दिशे मिष्टभो
ज्यनैः॥६०॥ हरदेशागतान् लोकान् व्यसृजत्स ततः प्रभुः॥ तालकोशीयलोकास्तु प्रायशो नययुस्तत
ः॥६१॥ श्रवणगुणकीर्तनं हरेः स्मरणं चार्चनं वंदनं तथा॥ सततं तु प्रकुर्वतो ययुः स्वगणसाम्यनादि
ना निस्वं नृणाम्॥६२॥ इति श्री सत्संगिजीवने नारायणचरित्रे धर्मशास्त्रे चतुर्थप्रकरणे कार्यायनगा
मे स्वर्गनरकगामिपुरुषलक्षणनिरूपणनामा चतुर्दशोऽध्यायः॥१४॥ सुव्रत उवाच॥ प्रबोधमुत्सवेऽतीते
ततो देशान्निजं निजम्॥ हरदेशीयलोकेषु गतेष्वेवात्र या प्रभोः॥१॥ हेमंतसिंहो नृपतिर्भक्तवाक्सज्ज
मीत्रितुः॥ तत्रैव ह्यानि जगृहे व्याधिमतां रज्जो भवम्॥२॥ सह स्वदेशीयजनैः परिवारेण चात्मनः॥ त
त्रैवोवास नगरे निनीषुः स निजं हरिम्॥३॥ चास्तीं खगृहे सत्प्रवुर्वस्तत्तेनाऽतिमानितः॥ प्रार्थनावस
रं पश्यन्नस्त कामहृन्नत्रपम्॥४॥ गंगाख्या तस्य माता च भार्या जय हराभिधा॥ भ्राता चानूपसिंहाख्यस्त
ज्जाया प्राणसंज्ञिका॥५॥ अदितिर्भगिनी तस्य मोदिन्याख्या च बंधुजा॥ इत्याद्याभिश्च स्वजनैः सहितः स न
राधिपः॥६॥ सप्तारामप्रभृतिभिस्तद्देशीयैश्च पूरुषैः॥ लाडिनीप्रमुखाभिश्च तद्देशस्त्रीभिरन्वितः॥७॥

॥स॰गी॰च॰॥ चतुर्थेदिवसेप्रातः सभायामास्थितंप्रभुम्॥ प्रणम्यप्रार्थयामास प्रसन्नं सर्ववित्सतम्॥ ९॥ हेमंतसिंह अ॰१५॥
॥ २९ ॥ उवाच॥ भगवन्सर्वजोकेश भक्तवत्सलसत्तमे॥ दासे मयि कृपां कर्त्तुं लसदेकाश्रयेऽर्हसि॥ १०॥ त्वमेवो
त्रपयास्वामिन्कुलस्तदन्नमात्रये॥ कर्त्तेवीनवतानूनमन्सद्धर्मार्धप्रवर्तक॥ ११॥ भक्तप्रियस्यतेनाथ
स्वभक्तेष्वखिलेष्वपि॥ समानावृत्तिरेवास्ति निर्धनेषु धनिष्वपि॥ १२॥ अस्मद्देशीयलोकास्तु नीर्णदु
र्गागमं तव॥ शृणोमि त्वंतिभगवन्स्त्वद्दर्शनंनमे॥ १३॥ तदीवदोर्जजितुदीमयरामद्विजोब्रवीत॥ भग
वन्नेवमेवत्वं कर्त्तुमर्हसिसर्वथा॥ १४॥ प्रतीक्षंतेजनाः सर्वे देशेऽस्माकंतवागमम्॥ भक्तकल्पद्रुम
त्तिर्णोपूर यत्वंमनोरथम्॥ १५॥ तदर्थमेवसंनाराः सस्नेनच॥ राजातोसप्रभोनूर्णंकुरुपूर्णमनो
रथम्॥ १६॥ इत्यर्थितस्तेनराजानूकृष्णहेनतेनच॥ नष्किकपटभावतःप्रीतोभूपाग्वदत्प्रभुः॥ १७॥ आगं
मिष्यामिनृपतेत्वसुरैर्मुनिभिः सह॥ तवनिष्कपटंभावमहंजानामिनिश्चितम्॥ १८॥ इत्थंवदत्येवहरौ ना
गर्टकपुराधिपः॥ सुरोवर्द्धजजितुरस्तत्रागात्त्वरान्वितः॥ १९॥ नाम्नासातिस्त्वतत्तत्त्वीधन्वावधूत्वनस्तु
ते॥ नायाख्यस्तत्सुतश्चेत्तेतत्त्वश्चारापुर्दुर्लभम्॥ २०॥ तस्युराधिरूतोवेदपोनाम्नासिंहःसभायेकः॥ सो ॥२९॥
ऽप्यागतोऽपतैःसार्कंनत्वाप्रोऽब्रवीद्धरिम्॥ २१॥ भगवन्सपुरंनेतुंत्वामहंसमुपागतः॥ वरूम्हाम्यनी

तानिष्यितस्याऽत्रममस्वकेः॥ २२॥ तस्मिन्नपिकृपांकर्त्तुंत्वमर्हसीतिताश्रिते॥ इतिसंप्रार्थपूतंतंहृष्ट
सोऽचिंतयद्धरिः॥ २३॥ उभावेतावपिदृढंभक्तौनिष्कपटौमम॥ सहपार्यपतश्चद्वौवेशेचोभौसमौम
म॥ २४॥ अवश्यमेवहिमयाप्रियंकार्यंद्वयोरपि॥ आदौकस्यपुरंयामिनेरोनयामाद्युयोमयो॥ २५॥ चिं
तयन्निति तिष्ठंस्त्वंविचार्यकथयामिते॥ इत्युक्त्वावासभवनंजगामसत्वरंहरिः॥ २६॥ मंत्रमास्थायतत्र
ऽसर्वतोपिहनासधृत॥ ब्रह्मानंदमुनिनित्यानंदंचाऽह्वास्तसोऽनघ॥ २७॥ उपविश्यरहः स्थानेसाकं
ताभ्यांसर्वेश्वरः॥ पत्रछत्तौवरीयांसौनिजभक्तौमहामती॥ २८॥ युवांप्रेष्ठतमौमेस्थौनेत्रेणवद्विसहि
यौ॥ अतीवनिपुणौसर्वकार्यावबोधने॥ २९॥ अतःपृच्छामिवामद्यतातंसंशयमात्मनः॥ सुरहेमंतयोः
मध्येप्राग्गच्छामि कस्यवाऽपुरम्॥ ३०॥ गतेत्वेकस्यनगरंद्वितीयाप्रियतामवेत॥ गंतव्यंत्वसमाऽवश्यमऽतो
युक्तमिहोच्यताम्॥ ३१॥ इत्थंद्विजोकोगुरुणासर्वंतेनापिपृष्टवत॥ संपृष्टेतौसहदयेविचारचक्रतु
र्मुनी॥ ३२॥ अयंहिभगवान्साक्षान्मानुष्यंश्रीजयन्॥ अनुग्रहंकरोत्येवसंश्रद्धनमिषेतानी॥ ३३॥ दे
वाब्रह्मादयोप्यत्रइरादेवाऽस्यदर्शनम्॥ जनैनेकापिनकापिसमीपस्थस्यहोरहः॥ ३४॥ गमनस्यनिषे
धस्तुकर्त्तुंशक्योऽस्यनाऽधुना॥ उत्कंठितोयतोऽस्येपगंतुनूनंस्वतःप्रभुः॥ ३५॥ निषेधस्यावयोर्युक्तीमें

॥स॰जी॰च॰ स्थानेनैषसांप्रतम् ॥ अतो ऽनुमोदनागमनं कार्यं प्रत्तीतरं किल ॥३५॥ इति निश्चित्य मनसा ब्रुवाते स्म तमीश्व अ॰ २६॥
॥२८॥ रम् ॥ यत्सृष्टं भवता स्वामिंस्तत्तेत्र्यं भातिनौ किल ॥३६॥ उभौ भक्तौ समानौ ते प्रियं कार्यं द्वयोरपि स्तुतं ॥ तैर्मा
प्य गंतव्यं जीर्णदुर्गं त्वतिलया ॥३७॥ पुरं सूरस्य मार्गेऽस्ति न दुर्लंघ्यं त्वया प्रभो ॥ जीर्णदुर्गे कथं गंतुं शक्नोति न च
कदाचन ॥३८॥ न तत्रादीनागरे कं गंतव्यमिति नौ मतिः ॥ अतः परं पादरजो लाभं वै त्वं तथा कुरु ॥३९॥ कृत्स
लउवाच ॥ इति तयोर्वचनानि शास्त्रं तौ मतिमंतौ प्रवरौ स्मभाजयन् ॥ मुदितमानसः स महात्मा हरिरुवा
विद्धाद्गमनमात्मनः ॥४०॥ इतिश्रीसत्संगिजीवने नारायणचरित्रे धर्मशास्त्रे चतुर्थप्रकरणे कार्यायनग्रामे
हेमंतसिंहस्य पुरगमनमंत्रणे तत्पुरगमनसंमंत्रणनिरूपणनामा पंचदशोऽध्यायः ॥१५॥ हेमंतसिंहसोऽथाह स्व
रैश्रीयज्ञैः सह ॥ स्वपुरं गंतुवान्छामि यामि दृष्टतो हि ते ॥१॥ इत्युक्तः सतदा हृष्टो गंतुं संज्ञो ऽभवन्नृप ॥ ततः
सूरं हरिः प्राह गंतव्यं स्वपुरे द्रुतम् ॥२॥ आयास्यामि प्रातरहं तत्र प्रीणाः त्वं संशयः ॥ कारयित्वा हि तैः पाकं कु
र्यात्तु स्म प्रतीक्षणम् ॥३॥ इत्युक्तः सोऽतिसंहृष्टः सहस्वैः स्वपुरं ययौ ॥ वृत्तांतमेतं सकलं जयामच कथयदतिः
॥४॥ ततः ससंभ्रमं समुत्थाय तदाजितवासरः ॥ स्नात्वा नित्यं प्रकुर्वन्नमुत्तमं प्राह सत्वरम् ॥५॥ दिनाद्युयामे ऽपि ग
तौ दीर्घसत्त्रीभवान्किमुं घंटां वादयते ऽद्यापि सर्वसंक्षियते हि नः ॥६॥ किं किं कार्यं कर्तव्यमिति वदंतं तमुवाच ॥२९॥

सा ॥ नारायणं मुनि प्रोतिनीर्णदुर्गे सहर्षिभिः ॥७॥ गतस्तत्र स्निग्धजनैर्रतिप्रेम्णात्वनुसृतम् ॥ सेव्यमानः
पुनर्भ्रांतः कस्मान्नः पुरमेष्यति ॥८॥ सर्वे पि भक्ताः संस्पप्तमानाः समदर्शितः ॥ तस्मात्त्रयंत्रावर्धनलातं नि
वारय प्रनडुतम् ॥९॥ इत्युक्तः सद्गुतं प्रापादः तुलीपः प्रभोः पुरः ॥ हेमंतसिंहो स्त्रक्षीत्तं तावदा यां तमध्यानि
॥१०॥ हेमंतसिंहउवाच ॥ सविक्रपास्पतुलीपो धावन्नेव ससंभ्रमम् ॥ आमंत्रपितुमायामि त्वत्समीपमहं
किल ॥११॥ भगवान्मुनिभिः साकं जीर्णदुर्गमुपैष्यति ॥ तेन सा कंत्स्या ऽगम्यं तत्र पीर्थ्यैर्निजैः सह ॥१२॥ स
साश्रु मसतदा कंप बुद्धी द्वयसमो त्रृप ॥ हरियानं निषेधोक्तियुक्तिभिस्तमुवाच ह ॥१३॥ उत्तम उवाच ॥ बुद्धिमा
नमि सुतो ऽमि भ्रातस्त्वं जो कसंमतः ॥ त्वं बुद्धिपवलेर्ध्वे वर्षमंतिष्ठं तिमानवाः ॥१४॥ आमंत्रितस्त्वया स्वामी
स्वपुरं नेतुमद्य यत् ॥ अविचार्यैव तन्नूनं कृतमित्येव भाति मे ॥१५॥ शीतकालोऽधुना प्राप्तो देहिनां ल विदार
णः ॥ नीतारं प्राप्नु तस्यापि हिमं गेहेष्व पिदुःसहम् ॥१६॥ भूरिवाते पथि प्रातर्हरिणा दुःसहं न किम् ॥ तथा सत्सु पहा
स्याने भविता प्रेमभक्तता ॥१७॥ अनाद्दिर्यं तःस्थाः कं थाप्यप्पेते योगकौमलाः ॥ संतो मार्गेभाविष्यंति हेमंते हि
मपीडिताः ॥१८॥ अज्ञानाराराश्च विधवाः नक्तियोग सुपाश्रिताः ॥ अतु पानत्सदाया यो वा क्षुजिष्यंति कथं पथि ॥१९॥
प्रातः शीतांभसा स्नात्वा चजतो हि मवेपितान् ॥ दृष्ट्वा हरिर्जनान्मार्गेत्वां शप्स्यंस्सऽपकाअपि ॥२०॥ कर्मणां ने

॥स०नी०चु०॥
॥ ३० ॥

नते चातः संसाः न्त्वर्याः स्तु मा कुव्वित् ॥ उत्तकालेतु मं प्राप्ति सुखिनातः कृतुनये ॥ २१ ॥ नावत्काले त्वया वै धीमस्व अ०१६॥
देवी पत्नैः सह ॥ स्थित्वा दुर्गे पुरे कार्यं निर्गम्या हरिदर्शनम् ॥ २२ ॥ भो मनीषा हि सुन यः प्रकामैस्तत्र त्वया ॥
समक्षे शूजनैस्तेषां कर्त्तव्यं हरिणा सह ॥ २३ ॥ कोवा विशेषः स्वगृहे हरिणैतैः पतः परा ॥ नगृहं गृह मित्याहु र्गृ
हिणी गृहमुच्यते ॥ २४ ॥ सीधेः पि सा न चेत्तर्हि सोः रण्यमिति कीर्तितः ॥ सा तु यत्र भवेत्तत्र गृहस्यो ऽमरैरितः ॥
२५ ॥ मातृजायाः स्मदीयाः प्रवर्त्ततेः तत्त या सह ॥ हरिंस मूल्य वकु धा गार्हस्थ्य फल मान्नुहि ॥ २६ ॥ नमिचेगे हस्व
गृहाद ः गच्छा म्येच कथ्यते अतो वसन्नम गृहेष मुमोण यमादरम् ॥ २७ ॥ मेहादेतन्मया प्रोक्त मतः परमुदा
रधीः ॥ हितादिते विचार्य त्वं कर्तुमर्हसि यद्धितम् ॥ २८ ॥ कृष्णतत्र उवाच ॥ इत्युत्तम वचः श्रुत्वा मुक्तिवाक्यविशा
रदः ॥ बुध्वा विदुरतुल्योः सौ प्राह तत्रावकिम्प ॥ २९ ॥ हेमंतसिंह उवाच ॥ सम्यगेवो च्यते भ्रातस्त्वया स्वार्थे सुरक्ष
ता ॥ कनीयसोः पि बुद्धिस्ते वृद्धधीभ्यो ति निश्चिते ॥ ३० ॥ परोपकार शीलानां सतां नित्यं समागमम् ॥ कुर्वन्नपि भवा
नेतां स्वार्थ बुद्धिं कुतोः भगात ॥ ३१ ॥ आतिन हेतुनामन्दुर्गां दुर्गागमः प्रभो ॥ निषिध्यते युक्तिविदा त्वया त्वत्तो त्तरं
ब्रुवे ॥ ३२ ॥ निवानाज्य गृहा मे हैनरयानेहरिसत्वे ॥ उपवेशे पि वनेप्या मि त्रीन्तवा धाक्त तद्भवेत ॥ ३३ ॥ तपस्विनोः वि
जायो पार पि पुत्राक रेषु ताः ॥ गार्भागारे स्थिवाः स्या प्यने ष्या मि सुख मध्वनि ॥ ३४ ॥ यामार्ईं प्या रौः ति कांते सं तः स ॥ ३० ॥

वैचवर्त्मनि ॥ वसिष्यंति सुखेनैव नात्या तपनयेयतः ॥ ३५ ॥ धर्मकालस्तु पापानां प्राणहा विषवायुना ॥ किंवि
चार्य त्वया श्रेष्ठाः त्रोच्यतेशीतकालतः ॥ ३६ ॥ गृहस्थ धर्मस्य फलं यत्त्वयोक्तं च युक्तिभिः ॥ तत्र यैवत्वयाका
र्यं नार्णां दुर्गम्पि सवै ॥ ३७ ॥ अवद्याय तीतावद्वी हरिं प्रार्थयतो मम ॥ तदेदानीं समामाहत्या यानात्वसुरेत्विति ॥ ३८
॥ कलौ न्मुखस्य मेः द्वैव मनोरथमहातरोः ॥ उन्मूलकेत्वयीदानीम पूर्वेनिह लक्षणम् ॥ ३९ ॥ तत्रायाते भयवति
जनास्तं कोटिशः ॥ पथि संवीक्ष्य नरदेहस्य सद्यः प्राप्स्यंति वै फलम् ॥ ४० ॥ वीक्षामात्रेण पापघ्नान्सतश्चापि सहस्र
शः ॥ वीक्षाने केपाम्भजना अपि मोक्ष्यंति संसृते ॥ ४१ ॥ ईदृक्पुण्योत्पत्तिकालोः पु त्कृष्ट ज्ञानवान्भवान् ॥ तन्निः
बेधेन लोकेषु माभूदाः न्वर्थ संज्ञकः ॥ ४२ ॥ उपभोगं पसमं त्युः त्र भ्रातृभिः पैतृकं सुखम् ॥ एक एव चिरं त्वं तु भुंज
माणोः ब्रवीषि किम् ॥ ४३ ॥ स्वयमेव विनर्जे के भुंजते सुखवैभवः ॥ पित्राः र्ज्य स्तैदी यमानं त्वं निषेधन्ल ज्ज से
॥ ४४ ॥ भगवत्तं गृहीत्वैव विना पित्रेरणां मम ॥ न यामसुरमा गम्यमे तत्तौ हार्ई लक्षणम् ॥ ४५ ॥ करा वित्र शरीर
स्यनेत्र यो रिव पक्ष्मणी ॥ अग्रे रितेहितं कुर्याचद्धि मित्रं प्रचक्षते ॥ ४६ ॥ नित्यं पर त्वमेवाः स्तु त्वयि मित्र प दस्यमोः
॥ पुत्त्वं तु कर्हि चिन्मास्तु सा हार्यं कुरु मे मरवे ॥ ४७ ॥ कल्याणउवाच ॥ इत्युक्तस्तेन सहसम्नु वाचो त्तमनृपतिः ॥ पा
दज्ञो ज्ञो भगवेत्तो भविष्यति तयाः खिलम् ॥ ४८ ॥ इत्युक्त्वा सहरेः पार्श्वं जगाम नृपतिः सच ॥ सा वासे सम्पुपे त्यैः

स्यं विचारमकरोद्धृदि ॥४९॥ श्रेयांसि बहुविप्राणां निःस्वेषां वाञ्छितं चामृत ॥ यतितव्यं यथाबुद्धि तत्फलं रा 
स्यति प्रभुः ॥५०॥ विचार्येति नृपो राजन् कृतं विप्रेशास्त्विणम् ॥ स्वकार्ये विप्रशास्त्यर्थं त्वार्ययामास सादं
रम् ॥५१॥ आगामिन्यां चतुर्थ्यां तु गणेशागुरुजडुकैः ॥ यक्षेश्च हरवासिंहरेर्मेकार्ये विप्रवृन्दवत् ॥५२॥ इति
संप्रार्थ्य विप्रेशांस्तद्देशीयाञ्जनांस्तथा ॥ स्वजनान् स्वपुरं सर्वान्निमंत्रयन्नत्युग्रासयन् ॥५३॥ ततो नृपोऽसौ
नृपसत्त्ववाक्तां हरेर्विदं स्तस्य चमत्कृतरूपताम् ॥ तदेतिका श्रुत्वा तं मित्रशंकितः पुनश्च तत्सार्द्धमुपेत्य त
स्थौ ॥५४॥ इति श्रीसत्संगिजीवने नारायणचरित्रे धर्मशास्त्रे चतुर्थप्रकरणे कार्यायनग्रामे भगवद्गाने दे
र्मतसिंहोत्तमयोः परस्परोक्तिप्रत्युक्तिनिरूपणनामा षोडशोऽध्यायः ॥१६॥ कव्रत उवाच ॥ अथायनायपि
रास्तु युक्तिकाददवंधनाः ॥ श्रुकर्षिणाऽऽपापयंतं हरिं प्रापोत मोन्नृप ॥१॥ तत्र्यमे चतुस्या एतस्य विदित्वानि
श्चयं प्रभोः ॥ ज्ञानकैः प्रहसन्नूत्तेन कृतकांतिकः सत्तम ॥२॥ कव्रत उवाच ॥ प्रयाणनिश्चयं स्वामिंस्त्वयं
श्रुत्वाजयादयः ॥ घोषितो हृदि खिद्यंते शीतम्जानेत्तवाः ध्वनि ॥३॥ श्रीनारायणमुनिरुवाच ॥ द्विमाचजो
पलकैः वजन्मनृभिर्ममागस्यतः ॥ अस्ति शीतसदृशं दुःखं देहस्याभाविको गुणः ॥४॥ अतश्चिंतां न कार्यैति
ब्रूहितास्त्वं नराधिपरस्तुक्तः ॥ सोऽभवत्तूष्णीतस्त्वा तेऽमवि दत्तुप ॥५॥ निश्चिकायत तो राजा न गिनीभांस ॥३१॥

वतम् ॥ स्वपुरं पुनरानेतुं गम्यं तेन सहैतिसः ॥६॥ अथ षष्ठीदिने डिः कृतमंगला जाबीहर्षी समारुह्य च तज्जिना
स्वाम् ॥ साकं मुनीन्द्रैर्निजपार्षदैश्च द्रुतः प्रयातिस्म स नागरेकम् ॥७॥ तमन्वयुर्वास्तुनृपप्रधानाः सत्कुं
तहस्ताव रथोऽश्वनारः ॥ हेमंतसिंहोत्र पदन्तमश्च योषाजयाद्याः स्वरथाधिरूढाः ॥८॥ निधाय पेटान्नृत
पुस्तकाश्च स्वनस्तु सर्वाग्रनरैः समंते ॥ अर्कं मुनिर्भिसोऽथ हरिर्यतीसमहाश्च वारैः प्रचचालजरीघ्नम् ॥९॥
॥ पृष्ठे विधायाःखिलसादिवृंदं मनोजवा यान्त्हयीवरायाः ॥ पुरश्च जं साऽपि सोऽग्रयानान्नरश्च मु
नीन्द्रानः हसन्प्रविचित्रम् ॥१०॥ नृपानिन्नुर्यासिमहामुनीनां हरेः पुरस्ताद्रथपृष्ठतश्च ॥ तदाथहर्षं त्वचपा
र्श्वयुग्मे तस्मिंस्तु दीर्घे ध्वनिसर्वतश्च ॥११॥ स संगवांते भगवान्नवा ग्रामेतु सूरसचजोहसंतम् ॥ सरोः
पियत्रैमहरेः ॥ प्रतीक्षां करोति पार्के सविधाप्रविशैः ॥१२॥ श्रुत्वागतं तं सजपेत्वनेत्रग्राम्याश्च पौराश्च
जनाः सहर्षम् ॥ ग्राम्याः प्रभुं ग्राममुदार आवा वादित्रघोषैः सततश्च निन्युः ॥१३॥ तत्रमुकुन्दः सिंहसंज्ञः
पद्जोऽन्येऽपि विज्ञाः ॥ ते सर्वे सहसूरेण समुनिं तं सिषेविरे ॥१४॥ दिनानि कतिचित्तत्रग्राम्यानानंदयन्प्र
भुः ॥ तैरर्च्यमानोन्यवसादृष्याः लंकारभोजनैः ॥१५॥ सभायां प्रत्यहं तत्र धर्मांश्चवर्णाश्रमोचितान् ॥ जनेभ्यः
कथयामास भक्तिज्ञानोपबृंहितान् ॥१६॥ सूरसिंहादिभिर्भक्तैरनघोल्पं मुकानि च ॥ सस्मेदत्तानि सद्दे

॥स॰जी॰च॰॥ भोजनं भोजितास्तत्र संसदि ॥ १७ ॥ ग्रामे तस्मिन्वाटिकाभ्यो ऽहं तानीकाभ्यो वृन्ताकादीनि भूरिशः ॥ ग्रामीणा आहरं- अ॰१७॥
॥३२॥ ति स्म तस्मै शाकानि चान्वहम् ॥ १८ ॥ तेषां संस्कारचातुर्यं पाचकेभ्यः प्रदर्शयन् ॥ संस्कृत्य भूरिशो जेन प-
पाचापि स्वयं प्रभुः ॥ १९ ॥ संधुक्षितानके ऽग्निं तद्भु परिशुष्क तैलकराहं निधाय क्षिप्त्वा ऽत्र भूरिशस्मिन्व-
तिकरः कदितेनारुह्य ताकशाकम् ॥ २० ॥ क्षिप्त्वा तु कारकारीकरकमलजस्तदत्तकीवीक्षमाणः पीता
पीतांशुकः स्मास्यदस्मितवदनान्सो ऽच्युतश्मेरचक्षुः ॥ २१ ॥ शाकं संस्कृत्य भक्तान्क्रमरचितमहापंक्ति
श्रीपवेत्तमत्रीतापात्रेषु तेषांच पजततरमसौ संददत्त्वा रुदर्थां ॥ पूर्णं लत्स्वादमार्गनतितुरसतपान्ना ऽश्नुतो
भूरिभक्तान्श्रवणं स्तस्य शंसां सांप्रभुरतिसुमुदे संचरन्पंक्तिमध्ये ॥ २२ ॥ ईत्थं नृनान्संचरितेर्भक्तानानं-
दयन्प्रभुः ॥ नागरंकत्ततः प्रायासुरं परिवृतो निजैः ॥ २३ ॥ त्वावासं तत्र सूरस्मगरहे च केसवाऽपरान् ॥ पु-
र्णमावासयामास भक्तान्सर्वान्यथोचितम् ॥ २३ ॥ सभार्यैः ससुतैः सूरस्तस्य नेपांयथोचितम् ॥ आति-
थ्यमकरोद्भक्त्या श्रद्धयाऽत्युदारधीः ॥ २४ ॥ पूजां च कारमहतीं भक्त्या राजा निजप्रभोः ॥ वस्त्रैराभरणैः ज्ञा-
त्वा रूपमुद्रावर्णेन च ॥ २५ ॥ चंदनैः पुष्पहारैश्च सद्वस्त्रैः श्रद्धयान्वितः ॥ सपुत्रः ससुतः सर्वान्भोजैर्नाना
विधैरपि ॥ २६ ॥ तेनातिमानितो भक्त्या भगवाद्दिनपंचकम् ॥ उवास सानंदयन्भक्तान्स्वापयन्धर्ममे- ॥३२॥

वसः ॥ २७ ॥ चतुर्थे दिवसे तत्र सभायामास्थितः प्रभुः ॥ उवाच भक्तान्सकलान्माहिणस्नानि नस्तया ॥ २८ ॥
॥ श्रीनारायणमुनिरुवाच ॥ भक्ताः शृणुत सर्वेऽपि माघो भवत्युत्तरायणम् ॥ स्नानं दानं यथाशक्ति कर्तव्यं त-
त्र सर्वथा ॥ २९ ॥ चत्वारिंशत्तु घटिका मकरे ऽर्कस्य संक्रमात् ॥ उत्तराः पुण्यकालो ऽत्र ज्ञेयः स्नानादिक-
र्मसु ॥ ३० ॥ माघस्नानस्य चारंभः पौष्यामत्राऽखिलैर्जनैः ॥ कर्तव्यस्तत्र मुख्यं तु तिलदानं प्रकीर्तितम् ॥
३१ ॥ चांद्रायणव्रतं चात्र माघमासे विशेषतः ॥ कर्तव्यमुदितं भक्ताः सर्वपातकशोधनम् ॥ ३२ ॥ कृच्छ्र-
व्रतेषु सकलेष्वपि पुंभिरेतत्स्त्रीभिश्च यासु करमस्ति बृहत्फलं च ॥ प्रोक्तं ततो निजशरीरविशुद्धिहेतोः
कार्यं तपः प्रियपरं पतितुश्च सेवा ॥ ३३ ॥ इति श्रीसत्संगिजीवने नारायणचरित्रे धर्मशास्त्रे चतुर्थप्रकर-
णे भगवतो लोहग्रामनागरं कपुरगमननिरूपणनामा सप्तदशोऽध्यायः ॥ १७ ॥ सुव्रत उवाच ॥ इति नारा-
यणमुनेः स्वामिनो वचनं नृप ॥ श्रुत्वा शुकानंदमुनिस्तं नत्वा प्रश्रितोऽब्रवीत् ॥ १ ॥ शुकानंद उवाच ॥ माघ-
स्नानविधिं स्वामिन्श्रोतुमिच्छाम्यहं प्रभो ॥ चांद्रायणव्रतस्यापि विधिमेवक्तुमर्हसि ॥ २ ॥ सुव्रत उवाच ॥
इत्थं तपस्विना तेन मुनिना पृष्ट आदरात् ॥ जगदानंदयन्भक्तान्सर्वांस्तत्र च स सर्ववित् ॥ ३ ॥ श्रीनाराय-
णमुनिरुवाच ॥ माघस्नानविधिं तुभ्यं कथयामि मुने शृणु ॥ तीर्थ एव विशेषेण माघस्नानं विधीयते ॥ ४ ॥ य-

॥ स॰ग्री॰च॰ सहस्तीर्थ च पारे च वाह्यन स्नातुः सर्पं तमम्॥ विद्यालयस्थं कीर्तिर्ध्रुव सत्तीर्थफलमश्नुते॥ ५ ॥ अश्वत्थ ध्यानः पा ग्र॰१९॥
॥ ३३॥ पात्मानास्ति कोऽशुद्धिश्च संशयाः॥ हेतुर्निदारतस्थैते न तीर्थफलभागिनः॥ ६ ॥ प्रयागे पुष्करे प्राप्य कुरु
क्षेत्रमथापि वा॥ यत्र तत्र च वा स्नायान्माघे नित्यमिति स्थितिः॥ ७ ॥ त्रिरात्रफलदानश्च पाः कश्चिद समुद्र
गाः॥ समुद्रगास्तु पक्षस्य मासस्य सरितो पतिः॥ ८ ॥ अरुणोदयमारभ्य प्रातःकालावधि ध्रुवम्॥ माघस्ना
नस्य कालो हि पुण्यदो मुनिभिः स्मृतः॥ ९ ॥ उत्तमं तु सनक्षत्रं लुप्ततारं तु मध्यमम्॥ सवितर्युदिते स्नानं त
तो हीनं प्रकीर्तितम्॥ १० ॥ तृप्ति र्वै घोदकस्नानं तथा जप्यमवैदिकम्॥ अपात्रे येऽपि दानं च तथानुक्तमसा
त्त्विकम्॥ ११ ॥ ब्रह्मस्वत्र स्त्रिया चैव मंत्रवत्स्नानमिष्यते॥ तूष्णीमेव तु शूद्राणां स्त्रीणां च मुनिसत्तम॥ १२ ॥ पौ
र्णमास्यां तु पौषस्य प्रारभ्य स्नानमाचरेत्॥ त्रिंशद्दिनानि पुण्यानि मकरस्थे दिवाकरे॥ १३ ॥ अथावृत्त ब्रह्मचारी र
स्तु यः माघ्यां स्नानमाचरेत्॥ पदे पदेऽश्वमेधस्य फलमाप्नोति मानवः॥ १४ ॥ ततः स्नात्वा शुभे तीर्थे दत्त्वा शि
रसि वै मृदम्॥ वेदोक्तविधिना ब्रह्मन् सूर्यायार्घ्यं निवेदयेत्॥ १५ ॥ पितॄन्संतर्पयेत्तस्यां चतीर्थं च ततो न
जात्॥ इष्टदेवं नमस्कृत्य पूजयेत्पुरुषोत्तमम्॥ १६ ॥ गृहाश्रमी ब्रह्मचारी च शक्तः स्नानं समाचरेत्॥ अशक्तो
नियमाचारे स्नानमात्रं समाचरेत्॥ १७ ॥ यथा कर्तव्य कर्तव्यं माघस्नानमिति स्मृतिः॥ अतिसत्त्वास्थानतिवृ ॥ ३३॥

द्धाः स्नायु रुष्णेन वारिणा॥ १८ ॥ तिलस्नायी तिलोद्वर्ती तिलहोमी तिलोदकी॥ तिलभुक्तिलदाता च षट्ति
लाः पापनाशनाः॥ १९ ॥ सरितो याः शुभावे तु नवकुंभस्थितं जलम्॥ वायुना ताडितं रात्रौ गंगातोयसमं विदुः
॥ २० ॥ नास्ति पातकं लोके यन्न स्नानाद्विनश्यति॥ मासोपवासादधिकं माघस्नानं मुने ध्रुवम्॥ २१ ॥ नीच
तो भुज्यते दुःखं स्वर्गतो दुःखं न पश्यति॥ एतस्मात्कारणाद्भूमौ माघस्नानं विशिष्यते॥ २२ ॥ अहन्यहनि दात
व्यास्तिलाः शर्करयान्विताः॥ त्रयो भागास्तिलानां द्विचतुर्थः शर्करा मतः॥ २३ ॥ माघावसाने रुचिरान् ष
ड्रसान्संप्रदापयेत्॥ दंपती वाससी सूक्ष्मे सप्तधान्यसमन्विते॥ २४ ॥ त्रिंशन्मोदकादेयाः शर्करातिलसं
युताः॥ ताम्रपात्राणि दद्याच्च तिलोपेतानि शक्तितः॥ २५ ॥ कंबलाजिनवस्त्राणि नानारत्नानि शक्तितः॥ चो
लकानि तु दिव्यानि प्रच्छादनपटांस्तथा॥ २६ ॥ उपानहौ पादुके मोचकौ पापमोचकौ॥ तथास्मद्पि यत्किं
चिन्माघे स्वसम्प्रियं भवेत्॥ २७ ॥ तन्माघस्नायिनां देयं विप्राणां भूतिमिच्छता॥ सर्वोपदाने वक्तव्यं माघः
प्रीयतामिति॥ २८ ॥ नदीतडागप्रस्रविवापिकादौ गृहेऽपि वा शीतजलेन माघे स्नानं विधेयं रविदर्शनात्प्राङ्ग
दाशीति ब्रह्मरूपेण च घस्तम्॥ २९ ॥ इति श्रीसर्वांगिजीवनेनारायणाचरित्रे धर्मशास्त्रे चतुर्थप्रकरणे नाग
रकं पुरे माघस्नानविधिनिरूपणं नामाऽष्टादशोऽध्यायः॥ १८ ॥ श्रीनारायणमुनिरुवाच॥ चांद्रायणव्रतस्या

थविधिं स्ववकवराभिते ॥ चैत्रमवादिषु शाणेषु पद्मोक्तं पापशुद्धये ॥१॥ शुक्लपक्षे चतुर्दश्यां पौर्णमासे समा 
हितः ॥ चान्द्रायणव्रतं मासं गृह्णीयात्सर्वपापजित् ॥२॥ गृह्णीयाद्ब्रह्मचर्यं च त्रिकालं स्नानमन्वहम् ॥ ज
ष्मीनारायणस्यार्चा कार्याः स्वं ऽस्त्वदीपकः ॥३॥ आज्येन तर्पयेद्वह्निं सर्वपापोपशांतये ॥ चरुं नैवेद्यतपा
सक्तून्कणान्यानपावकमेव च ॥४॥ शाकं क्षीरं दधिघृतं फलमूलोदकानि च ॥ फलमूलं तु वा पश्चात्याज्य
येन्मासादरात् ॥५॥ धात्रीफलोपमान्ग्रासान्पौर्णमास्यां सुनक्ष पेत् ॥ तद्ग्रासान्पंचदशैवाऽथ क्रासयेच्च
दिने दिने ॥६॥ विंशत्या सहितं येन कृष्णपक्षे भवेच्छतम् ॥ अमावास्यादिने चैव द्विजश्रीष वसेत्ततः ॥७॥ शु
क्लेपक्षतिमारभ्यं चैवं वृद्धिक्रमेण च ॥ विंशत्या सहितं भूयो ग्रासानां स्याच्छतं तथा ॥८॥ एकस्य प्रणवो मं
त्रो भूर्भुवः स्वश्च नवेदिह ॥ भुवस्तृवागां सश्वापि चतुर्णामिह एव च ॥९॥ नवेदयश्च पंचानां वर्णानां नवदशा हतः
समानां तु तपः सप्तमष्टानां परिकीर्तितम् ॥१०॥ कृष्णेवानां नवेदिह च दशानामेतत्राण च ॥ एकादशानामी
शस्तु तेजश्चातः परं भवेत् ॥११॥ त्रयोदशानां पुरुषास्ते तो धर्मः प्रकीर्तितः ॥ शिवः पंचदशानां च ग्रासानां मं
त्र उच्यते ॥१२॥ स्वाहाकारनमस्कारयुक्तैर्मंत्रैः पृथक्पृथक् ॥ अभिमंत्र्य तिलग्रासान्दिनसंख्याक्रमेण च ॥
१३॥ समाप्ते तु व्रते दद्याद्गां गुर्वे च द्विजातये ॥ चान्द्रायणेनैकेन सर्वपापक्षयो भवेत् ॥१४॥ उद्यापने नस 

हितं कृत्वैदं व्रतमाप्नुयात् ॥ इह लोके धनारोग्यं सुखं सौभाग्यसंपदम् ॥१५॥ प्राप्नुयात्परलोके च शक्रस्य सद
ने स्थितिम् ॥ विष्णुप्रीत्यै कृते त्वस्मिन्प्राप्नुयाद्धाम वैष्णवम् ॥१६॥ चान्द्रायणव्रतमिति श्रीकृष्णेन मयामुने ॥
प्रायश्चित्तव्रतेष्वेतन्मुख्यं तपाममम् ॥१७॥ सुव्रत उवाच ॥ इत्था श्रुत्य प्रभोर्वाक्यं शुश्रुकाने रस्तपेतरे ॥ तद्रथ
यश्चतुर्दृपत्ये प्रणेमुस्तमीश्वरम् ॥१८॥ ततः प्रभाते भगवान्पर्वस्नानं तिलोदकैः ॥ कृत्वा ददौ ब्राह्मणेभ्य
स्तिलपात्राणि कांचनम् ॥१९॥ सहस्रशः कंचुलीश्च नीशारांश्च सहस्रशः ॥ मतिजाश्च कंचुकांश्चाऽदात्त्ब्रा
ह्मणेभ्यः सहस्रशः ॥२०॥ ब्राह्मणान्भोजयामास तद्दिने भोजनैर्वरैः ॥ ददौ च दक्षिणां तेभ्यो भगवान्
धर्मरक्षकः ॥२१॥ संतर्प्य धार्मिकश्च मुनीन्सद्भ्यैर्भा तु निवासे स्वयमप्यभुक्त रात्रौ सदः स्थः सउपादिशत्स्वान्स्व
संमतां श्री कृष्ण भोक्ति शिक्षाम् ॥२२॥ इति श्रीसत्संगिजीवने नारायणचरित्रे धर्मशास्त्रे चतुर्थप्रकरणे नागटंक
पुरे चान्द्रायणव्रतविधिनिरूपणनामैकोनविंशोऽध्यायः ॥१९॥ सुव्रत उवाच ॥ दिनानि पंचैव स नागटंकप
त्तपुरे स भगवान्नुषित्वा ॥ सूरेण भक्तैश्च वृतोऽश्वविजैः स्वैर्हेमंतसिंहस्य पुरं प्रतस्थे ॥१॥ तं सोऽध्वनि प्राहस्व
पसदोशस्वग्रामामादीनयनस्ततस्त्वं ॥ पुरं व्रजिष्यामरतिप्रभुक्तेन येत्विशीर्षास उरीचकार ॥२॥ पक्षे कि
स्या मम वा पतस्य पंचाजसर्जु मराजिरस्य मम ॥ श्रुत्वा तमायातमनुपसिंहो ग्राम्यैः समं संमुखमाजगाम

२॥ नेतुं प्रणम्याभ्युत्थमादरेणाहेमंतसिंहः समेत्य सर्वे॥ वादित्रनादैः समयेव निन्युर्ग्रामं स्वभक्तं तमुदारकी
र्तिम्॥४॥ हेमंतसिंहोऽथ निजे गृहे तं निवासयामास सपार्षदं च॥ यथोचितं वासयतिस्म सर्वान्नन्यांश्च
भक्तान्नृपतिर्नृपवर्य॥५॥ हरेर्भगवतानीच स्त्रीपुंसानां स भूपतिः॥ यथोचितं यथावित्तं चकारातिथ्यमादरा
त्॥६॥ सर्वसंपत्समृद्धं स्वं गृहं स्वं सपरिच्छदम्॥ प्रभोरधीनं कृत्वैव तस्यावतिष्ठिवत्स्वयम्॥७॥ निवृत्तिधर्मि
वासाहं तग्रामं वीक्ष्य स प्रभुः॥ पूर्वोपानग्रसंचित्वारीन्विदन्नाह नराधिपम्॥८॥ ॥श्रीनारायणमुनिरुवाच॥
अयं ग्रामः समीचीनः सतां वासाय संमतः॥ जीर्णदुर्गपुरावासीनस्मभ्यो रोचते किल॥९॥ ग्रामस्तवायं प्रा
चीनस्तु रेवतेवै न हि॥ विशेषं नैव पश्यामि जीर्णदुर्गेन तस्य तः॥१०॥ न येयाय दित्रागम्मा तदहं दित्रांस्तु
वासरान्॥ वसाम्यत्र तु राजर्षे दित्रान्मासानपि ध्रुवम्॥११॥ इत्युक्तः स नृपो भूयम प्रीतः प्रोवाच तं प्रभो॥
यत्रैव जाते भवेत्तत्र सद्भिः सह सुखं वस॥१२॥ ममापि न विशेषोऽस्ति पुरे ग्रामातु कश्चन॥ पौराः स्वदर्शनं क
र्तुमत्रायास्यंति सर्वशः॥१३॥ तत्रोवास ततः स्वामी भक्तैः सह मुदान्वितः॥ भक्तानां नंदयन्सर्वान्स कुटुंबं नृपं
च तम्॥१४॥ यथोत्तमस्य नृपतेर्गृहं दुर्गपुरे प्रभोः॥ स्वकीयमेवाऽस्ति तथा गृहं तस्यापभूत्किल॥१५॥ स कुटुं
बस्य नृपतेस्तस्य भक्त्या वशीकृतः॥ सार्द्धमासं सुखेनैव न्यवसत्तत्र स प्रभुः॥१६॥ तद्दर्शनार्थमाजग्मुर्जीर्णदुर्गनि ॥३५॥

वासिनः पुरुषाश्च स्त्रियः॥ सर्वास्तद्भक्ताः स्निग्धचेतसः॥१७॥ ग्रामांतरेभ्योऽपि जनास्तत्राजग्मुः सहस्रशः॥ मा
नितास्ते भगवता स्व सद्दर्शनोत्सुकाः॥१८॥ तत्रस्थः शिवरात्र्यां च तत्राद्यावन्महन्॥ उपवासं हरिश्च
क्रेतदा भक्तजनैः सह॥१९॥ महारुद्राभिषेकं ब्राह्मणैः कारयत्तरि॥ कारयित्वा ददौ तेभ्यो दक्षिणां प्रचुरां ततः
॥२०॥ द्वितीयेऽह्नि समे विप्रान्भोजयित्वा सहस्रशः॥ चकार पारणं स्वामी धर्मोधव परिरक्षकः॥२१॥ प्रत्यसंच
सभासंस्थो नित्यं भक्तान्सदर्शिता॥ ब्रह्मविद्यात्मकां रां श्रुत्वैवरोकानप्यबूबुधत्॥२२॥ जन्मोत्सवं भगवतो नर
नारायणस्य च॥ फाल्गुने फाल्गुनीकृष्ण्ये महोत्सवमकरोत्प्रभुः॥२३॥ वत्सा जयेष्यथा पूर्वं समचकारमहोत्सवम्॥
तथैवात्राभिगवां श्रुकारानेद यन्निजान्॥२४॥ नानादेशागता जो काभक्त्याऽनचुस्तमीश्वरम्॥ उपचारै
र्बहुविधैरनेकैश्चाऽभ्युपायनैः॥२५॥ हेमंतसिंहस्तु नृपः स्वस्य हर्तस्य पूजनम्॥ चकार च विशेषेण तद्दिने तस्मि
न्निजैः सह॥२६॥ नानाविधानि वस्त्राणि मौक्तिकानि रूपाणि सः॥ अलंकारान्बहूंश्चैव मान्ददौ तस्मै च भक्तितः
॥२७॥ काश्मीरकेसरोपेतचंदनेन स्रगाधिना॥ अखंडै रक्षतैः श्वेतैः पीतैः हरैश्च द्रोणवरैः॥२८॥ अबिरेणाग्नु
लालेन महानीराजनेन च॥ संपूज्य पुष्पांजलिना साष्टांगं प्रणनाम सः॥२९॥ ततो रामप्रतापश्च माननुजः समपू
जयत॥ अमूल्यवस्त्राभरणैर्गंधमाल्याक्षतादिभिः॥३०॥ गंगादित्यादयो योषास्तं पुपूजुः सतां पतिम्॥ अ

मेपि पौराः सर्वे च ग्राम्याश्चार्चनं समाचरन् ॥ २१ ॥ स श्रीमान् कुशराजाय मुनीन् सर्वांश्च भक्तितः ॥ वेदना
क्षतपुष्पादीर्वै संनेः सङ्गिरार्चयत् ॥ २२ ॥ सिता स मिष्टैः पक्वान्नैर्भक्ष्यैर्भोज्यैश्च भूरिशः ॥ संतर्पयामास स
तान् नराधिप उदारधीः ॥ २३ ॥ तस्मिन्महोत्सवे रात्रौ महत्यां भक्तसंसदि ॥ समस्थितिहासनारूढाः राज्ञीकक्षे
स्थिता वधू ॥ २४ ॥ तत्रैव पौरग्रहस्थाश्च सधवा विधवाः स्त्रियः ॥ वीक्षमाणास्तमेवैकं निविडं निखिला अपि ॥ २५
॥ तानुवाच हरिर्भक्तान्संज्ञया कस्यचिद्धृदि ॥ कश्चिद्रुदितवेत्तर्हि रुदन्तेतितिन राधिप ॥ २६ ॥ संप्रेरणो नाऽयस
तामखंडानंदस्तदा वर्णिवरः प्रणम्य ॥ बद्धांजलिस्तस्तु रतौ निषण्णः पप्रच्छ तं सर्वविदं विनीतः ॥ २७ ॥ इति
श्री सत्संगिजीवने नारायणचरित्रे धर्मशास्त्रे चतुर्थप्रकरणे पंचालग्रामे दीक्षोत्सवनिरूपणनामा विंशो
ऽध्यायः ॥ २० ॥ कुशल उवाच ॥ अथ दैनांदिन लिख्यते ॥ तस्मिन्महोत्सवे रात्रौ महत्यां भक्तसंसदि ॥ समस्थितिहासना
रूढाः राज्ञीकक्षे स्थिता वधू ॥ १ ॥ तत्रैव पौरग्रहस्थाश्च सधवा विधवाः स्त्रियः ॥ वीक्षमाणास्तमेवैकं निविडं निर्नि
खिला अपि ॥ २ ॥ तानुवाच हरिर्भक्तान्संज्ञयाः कस्यचिद्धृदि ॥ कश्चिद्रुदितवेत्तर्हि रुदन्तेतितिन राधिप ॥ ३ ॥ संप्रे
रणो नाऽयस तामखंडानंदस्तदा वर्णिवरः प्रणम्य ॥ बद्धांजलिस्तस्तु रतौ निषण्णः पप्रच्छ तं सर्वविदं विनीतः ॥
४ ॥ अखंडानंद उवाच ॥ भगवन् ब्रह्मविद्यायाः सम्यग्वेत्ता प्रवर्तक ॥ एक एव त्वमेवाऽसि यत्र मुनेरीति स्थस्यः ॥ ३६ ॥

श्रावयन्तो महर्षीणामेषां प्रश्नमभीष्टकम् ॥ प्रश्नमेकं हि तं पृष्ट्वा ब्रूहि तस्योत्तरं प्रभो ॥ ६ ॥ एकमेवाद्वितीयं वै
ब्रह्मेति वदति श्रुतिः ॥ ब्रह्मैवेदं खल्विदं सर्वमित्यपि श्रुतिशासनम् ॥ ७ ॥ एतन्मतमुपाश्रित्य जीवेश्वरजगत्स्व
पि ॥ मायामयानि मिथ्येति प्राहुः केचन पंडिताः ॥ ८ ॥ नित्यानां नित्यस्त्याद्याः श्रुतीराजेव केंचन ॥ जीवेश्व
राणां नित्यत्वं विद्वांसोऽत्रवदंति हि ॥ ९ ॥ एतन्मोर्मतयोः स्वामिन्निर्णयं वक्तुमर्हसि ॥ उभे सत्ये किमथवा तयो
रेकमृते मतम् ॥ १० ॥ कुशल उवाच ॥ इति श्रुत्वा वचस्तस्य प्रोवाच स जगद्गुरुः ॥ हर्षयन्मधुरैर्वाक्यैः सदः सं
दःसंस्थानृषीश्च तम् ॥ ११ ॥ श्रीनारायणमुनिरुवाच ॥ मुनयः शृणुत त्वं वाऽखंडानंद महामते ॥ द्वैताद्वैतेवदं
तीनां श्रुतीनामाशयं ब्रुवे ॥ १२ ॥ ब्रह्मसत्ता ब्रह्मोमुख्यतया रूपमेव प्रवर्तते ॥ भगच्छब्दवद्धि हि व्यक्तितनानी हि नि
श्चितम् ॥ १३ ॥ स्वरूपेण गुणैश्चापि निरवध्यस्तिजास्थिता ॥ तस्यैवास्तीति ब्रह्मात्मामन्वर्थो श्रुतयो विदुः ॥ १४
॥ ततोऽमतत्तु विज्ञेयात ध्यानोपासनेन वै ॥ तत्त्वाधर्म्यात्तदात्मत्वा द्रूदसंज्ञाऽनुरागतः ॥ १५ ॥ स्वरूपं च स्वभा
वश्च विभूतिश्च तथा गुणाः ॥ नित्याः संति हरेर्द्योतं भ्यत्रत्वागेनुकामताः ॥ १६ ॥ स संतानमनंतं च यः सर्वज्ञ
श्च सर्ववित् ॥ इत्याद्याः श्रुतयोऽतस्तं तारतावर्णयंति हि ॥ १७ ॥ ईश्वरब्रह्मसाभिधः कृष्णोऽजयेद्याः संति केऽश्वरे
॥ विज्ञापयितुं प्रकृत्यादिशिष्यतेए क एव सः ॥ १८ ॥ तमेकं चाद्वितीयं च वदंति श्रुतयो द्विज ॥ स्थितं तदियेत्र सपु

रेनिर्गुणं चेश्वरे परम्॥ १९॥ उपासनेन यस्तस्य प्रायः आत्यंतिकं लयम्॥ निर्विकल्पस्थितो तं स योगी प्रकु
तिकेवलम्॥ २०॥ ब्रह्मैव ब्रह्मविदिति श्रुतिवर्ण्यः स योगिराट्॥ महामुक्त इति प्रोक्तस्तत्वविद्भिर्द्विजोत्तम॥ २१
॥ समस्तं खल्विदं ब्रह्म तज्जलानिति पश्यति॥ ज्ञानआनंदरूपं च सच्छुद्धं ब्रह्मवित्तदा॥ २२॥ विना ब्रह्मस्वरू
पं स्तनोर्ध्वं नाधो न चोत्तरे॥ न विश्वं नेश्वरं नैव जीवान्किंचिदपीक्षते॥ २३॥ स्वरूपस्थितिं प्राप्यितुं तीव्रवैराग्य
वेगिनम्॥ गुरुश्चैकमिति श्रुत्वा शिष्यं बोधयते विदम्॥ २४॥ एकं ब्रह्मास्मीति वर्णिन्नेव श्रुतिर्निरूप्यते॥ निसा
नोनिलरस्सेनेयथोक्तं तत्त्वचिंतकः॥ २५॥ मेस्थूराणां द्विजीवानां उयेप्राकृतीकृतया॥ आत्यंतिकेऽपि नैवा
स्ति स्वरूपस्य विना ज्ञानम्॥ २६॥ लये प्राकृतिके देहे विराट्कृतात्मसंज्ञितो॥ स्थूरस्य विलीयेनैव वै वर्णिसत्तम
॥ २७॥ अव्याकृतेन देहेन स आस्ते प्रकृतौ तदा॥ स्थूलसूक्ष्मौ न यादे होर्जीवानामपि न व्ययतः॥ २८॥ त्रिगेभ
वंति प्रकृतौ ते कारणाख्याः शरीरिणः॥ प्रधानसंज्ञा वर्णींद्र सा तु प्रकृतिरूच्यते॥ २९॥ त्रिगेभवति सा मूलप्रकृ
तौ च सपूरुषा॥ न तु स्वरूपतो नाशो त्योते यां भवति क्वचित्॥ ३०॥ आत्यंतिके च प्रलये प्रकृतिः सापि पुरुषे॥ त्रि
गेभवती सूर्यस्य प्रकाशो रजनी यथा॥ ३१॥ स महापुरुषः साकं महत्तामायया तया॥ शेतेऽक्षरस्य प्रकाशेत
देकः रूप एव हि॥ ३२॥ नश्यकारणादेहा विमुक्ता ध्यानबलेन तु॥ रूपस्य दिव्यदेहेस्ते ब्रह्मण्येवासतेऽक्षरे॥ ३३॥ ॥३७॥

लयं द्वयेऽपि नैतेषां स्वरूपेण विना ज्ञानम्॥ भवतीति श्रुतिः स्वज्ञाचिन्मानाद्महामते॥ ३४॥ उत्पत्तिकाले
सर्वेऽपि पुंप्रकृत्यादयः पुनः॥ आविर्भवं समीचित्रपपापूर्वैं तदिच्छया॥ ३५॥ अप्राकृतशरीराये मुक्तास्ते
तु निजेच्छया॥ आविर्भवंति त्यूथवानेनाऽवतरंता सह॥ ३६॥ निलाने तान्छुतिशीक्ता ज्ञानिमुक्तविदेहिश्
॥ रूपमोपास्ति बलेनापि वीक्षंते च यथातथम्॥ ३७॥ योगिनस्ते तु संपन्ना भक्तिज्ञानविरक्तिभिः॥ समाधि
सविकल्पहि प्राप्ताऽस्य च गम्यताम्॥ ३८॥ मेरौ स्थिता यथा तस्मादवराम वैतान्नराः॥ वीक्षंते च द्रुमान्सर्वां
स्तदाधारं च भूतलम्॥ ३९॥ सविकल्पसमाधिस्था ज्ञानिमुक्तास्तथेश्वरम्॥ मायाश्रीवांश्च वीक्षंते ब्रह्म सच्चते
ऽथकृपृथक्॥ ४०॥ जीवकोजीकाच जस्याश्च यथा वा पुरुषाद्विज॥ पश्यंति कंभूतं जनोस्सर्वान्पिनगानदु
मान्॥ ४१॥ तथैव ते महामुक्ता निर्विकल्पसमाधयः॥ न सैकमेव वीक्षंते जीवेशादीन्तु पृथक्॥ ४२॥ रूप
मोपास्ति बलं यस्माद्यतारतम्य वशादमी॥ त्रिविधा मुक्तिकथ्यंते निर्विकल्पसमाधयः॥ ४३॥ स्वकुक्षाबी ह्नी
वस्य बुद्धीन्द्रियमनो जयात्॥ स्वयं चोपशमोपारमवर्त्तते वर्णिसत्तम॥ ४४॥ साक्षात्कृष्णे यस्य पुंसो बुद्धीन्द्रि
यमनोजयात्॥ नाहं कृष्णं चोपशमो जायते स्मात्स आदिमः॥ ४५॥ स्वकुसौ प्रजयाख्यायां ब्रह्माण्ड स्वाभि
मानिनः॥ जयात्रिजीकर्रेशस्यस्यं यादृक्शांतता॥ ४६॥ साक्षात्कृष्णेयस्य पुंसो बुद्धीन्द्रियमनोजयात्॥

॥स॰जी॰ष॰ तादृक्रूपस्वरूपं चोपशमो जाग्रतिस्यात्समधूपः ॥४७॥ विराट्तत्कारणैः स्यात्कंप्रधानस्य जगाद्यथा ॥ प्रकृ- अ॰२१॥
॥३९॥ तौ प्राकृतजये सूक्ष्मं पुंसश्च ज्ञानतता ॥४८॥ साक्षात्कृष्णेयस्य पुंसो बुद्धीन्द्रियमनोजयात् ॥ तथा सूक्ष्मंचो-
पशमो जाग्रतिस्यात्सर्वोत्तमः ॥४९॥ कृष्णसंबंधिसौख्यं यत्सर्वसौख्याधिकं हितत् ॥ दृष्टान्तमात्रमेतत्तु सु-
खुस्यादिसमीरितम् ॥५०॥ इत्थं हि ते महासुखा नवं त्रिविधा द्विज ॥ उत्तरोत्तरतः श्रेष्ठाः कथ्यंते स्थितिवे-
दिभिः ॥५१॥ निर्विकल्पस्थितिर्वजाकुन्मतान्मसदृश्य ॥ जीवेशानेकस्थितान्याकृतिरिति जानीहि निश्चितम् ॥५२
॥ एकत्वमेवं वर्णोऽत्र श्लोकंवावगम्यताम् ॥ श्रुतिप्रामाण्यतो विद्धि सत्यमेव मतद्वयम् ॥५३॥ ये तु नैवं स्थितिं प्रा-
सा ब्रह्मैक्यं शास्त्रमात्रतः ॥ बुध्वा यथेष्टाचरणं कुर्वते ते पतंत्यधः ॥५४॥ तादृशाः स्वकृतं पापं स्वशिष्या-
णां च पातकम् ॥ आर्त्तनादेन कुर्वंतो बोधयन्ते यमाज्ञये ॥५५॥ ब्रह्मशब्दद्वयं यत्र प्रोक्तं स्यात्तत्र तु द्विज ॥ आ-
द्यं तु भगवद्धाम महत्तत्त्वं तदक्षरम् ॥५६॥ द्वितीयं तु स्वयं कृष्णः सर्वकारणकारणम् ॥ अक्षरात्स परस्त्युक्तो द्विधां-
गश्चेति बुध्यताम् ॥५७॥ भेदो हि वास्तवो नूनं जीवेशब्रह्मणां हरेः ॥ नित्यानां नित्यइत्यादिश्रुतिभिः प्रतिपादि-
तः ॥५८॥ ब्रह्मविस्वरमाप्नोती सेषा श्रुतिरपिस्फुटम् ॥ प्राह ब्रह्मविदां सेव्य परब्रह्मेति सन्मते ॥५९॥ आत्मा-
शरीरं यस्यास्ति नैवात्मा वेति यं तथा ॥ पश्चात् रोपमयतित्थात्मानमस्मृतः प्रभुः ॥६०॥ शरीरमक्षरं यस्य नैव यं ॥३९॥

वेति चाक्षरम् ॥ यश्चान्तरे यमयति त्वक्षरं सोऽमृतः प्रभुः ॥६१॥ इत्याद्यर्थाः श्रुतिगणोत्तक्षरब्रह्मणो-
पि च ॥ प्राहुः कृष्णशरीरत्वं तद्भिन्नत्वं तथा स्फुटम् ॥६२॥ अक्षरस्यापि चेन्नास्ति ब्रह्मणः कृष्णरूपता ॥ कु-
तस्तर्हि तदेशस्य जीवस्य तु कुतस्तमाम् ॥६३॥ ततो निःसंशयो भूत्वा मुमुक्षुः सर्वथा हरिम् ॥ योभजेत समु-
क्तः स्यादितरः संसृतिं व्रजेत् ॥६४॥ श्रीमद्रामानुजाचार्यैरयमर्थः सविस्तरम् ॥ निर्णीतोऽस्ति महाभाष्ये सं-
क्षेपान्मम चोदितः ॥६५॥ स्कंद उवाच ॥ इत्युक्ते श्रुतिसिद्धांतं हरिणा सनराधिप ॥ वर्णीन्द्रसाधवः श्रुत्वा
तेनेमुर्न्नष्टसंशयाः ॥६६॥ सत्यस्थानं ततो गंतुं तानाताप्याः द्विजान्हि जानन् ॥ प्रभुः स्वयं निजावासमाजगा-
म दयानिधिः ॥६७॥ इत्थं हरिस्तत्र सवाक्यिजासेर नेदं यन्न लक्ष्मेवभक्तान् ॥ हेमंतसिंहस्ममनोरथं च सं-
हृत्य नू नक्तर्गतो रुवाच ॥६८॥ इति श्रीसत्संगिजीवने नारायणचरित्रे धर्मशास्त्रे चतुर्थप्रकरणे पंचालनगरे
मेद्वैताद्वैतप्रतिपादकश्रुत्यर्थनिर्णयनिरूपणनामैकविंशोऽध्यायः ॥२१॥ स्कंद उवाच ॥ तस्माद्ग्रामात्प-
श्चिमायां दिशि किंशुककानने ॥ उदग्राः कारिताराज्ञा मुनीनामनकृच्छुमाः ॥१॥ एकदा पापमोचन्यामेकाद-
श्यां निशि प्रभुः ॥ जगाम कतिभिः शिष्यैः पार्षदैः सह तत्र सः ॥२॥ उत्तमेन च सोमेन हेमंतेन सवेधुना ॥ अ-
न्वितश्च मुकुंदेन तथारत्नजिदादिभिः ॥३॥ ददर्श तत्र सयुनीन्कुर्वतो व्रतजागरम् ॥ हर्ष्वीसकेन गीतेन ता

तीवाद्यो नृपयज्ञः ॥४॥ तेपि तेवाक्षंसे तस्थानत्वा सतुरसुत्तमम् ॥ वर्तांतिके दंडःपीवं न्यषीदन्तत्र सोऽत्यु
त्तः ॥५॥ तदाज्ञया पुनस्त्वक्रूर्तिं चहूस्त्री सकं ततः ॥ सिंहासनं तदभितो भ्रमतस्तन्मुखेक्षणाः ॥६॥ विचि
त्रपङ्गीते स्तहास पर्यंतःस्थितानननम् ॥ अचिकीर्त्तनगुणांस्तस्य निशीथोऽपाम्यपद्युत ॥७॥ श्रांतांस्त
दानीं मुनयो निषेदुस्तिहरेपुरः ॥ प्रसन्नं तन्मुखं प्रीत्या वीक्षमाणाः स्थिराशनाः ॥८॥ अथ तत्रैव पात
स्वदद्दृशुः सहसैवते ॥ सहोस्य कोटिसूर्येंदु तुल्यं भूतं महन्महः ॥९॥ भूतं संतेन च तेसर्वे प्रापुर्नूः स्वं दिशो
प्यत्र ॥ तत्राऽपश्यन्महपुंनेस्वेशांति दिव्यदर्शनम् ॥१०॥ दिव्यसिंहासनारूढं नवीनजलदासितम् ॥ सुधां
शुकोटिसंकाशं दिव्याभरणभूषितम् ॥११॥ दिव्यपीतांबरधरं दिव्यगंधानुलेपनम् ॥ दिव्यैः सुरभिभिः पौ
ष्पैः शोभितं हारशेखरैः ॥१२॥ सुभ्रूलतं सुनासं च पद्मपत्रायतेक्षणम् ॥ स्निग्धबिंबफलानोष्ठसस्मितान
नपंकजम् ॥१३॥ अनर्घ्यमौक्तिकसमदंतावलिविराजितम् ॥ धृत्वा कराभ्यां मुरलीं वादयंतं मनोहरम् ॥
१४॥ दधतं कौस्तुभं कंठे वनमालां च शोभनम् ॥ विराजत्हृदयश्रीवत्सं छीवत्सं तु किरीटिनम् ॥१५॥ कर्णयु
ग्मोत्तसद्दिव्यमकराकृतिकुंडलम् ॥ अकलकिलनंशाननस्वपंक्तिविराजितम् ॥१६॥ श्रीमदामविष्वक्सेना
द्यैः पार्षदसत्तमैर्निजैः ॥ सेवितं राजचिह्नैश्च छत्रचामरैः ॥१७॥ तस्य पश्चाद्वामभागे लक्ष्मीं पद्मकरां

चने ॥ कौसुंभवाससं गौरीं सर्वाभरणभूषिताम् ॥१८॥ मंदारपुष्पकबरीं दिव्यसीमंतभूषणाम् ॥ शारस्य
तेंदुवदनां पीनोन्नतपयोधराम् ॥१९॥ सुनासां सुदतीं सुभ्रूं जंतीचारुविलोचनाम् ॥ नादोत्तसहंसकयु
ग्मलनूपुरशिंजितो ॥२०॥ विशालभालविलसद्दिव्यकाश्मीरपत्रिकाम् ॥ स्वकपोलांनिष्ककंचीस्वेच्छाच
क्रैकवीक्षणाम् ॥२१॥ रत्नदंडेन लघुना चामरेणातिभावतः ॥ वीजयंतीं निजपतिं ता ददर्शी राधिकां तथा ॥
२२॥ दक्षिणेऽथ हरेर्देहमदरज्जुस्तिऽतिभावतः ॥ श्वेतांगं श्वेतवसनं दिव्यालंकारशोभितम् ॥२३॥ धर्मस्य वा
मभागेऽथ भक्तिं मूर्तिमतीं च ते ॥ ददृशुः स्वर्णगौरांगीं दिव्यवस्त्रविभूषणाम् ॥२४॥ अन्यानप्यदिव्यवपुषो
दिव्यालंकारवाससः ॥ अपश्यद्यौषितस्तस्य दिव्यांगांस्तु तांस्तथा ॥२५॥ ततः प्रणम्य तान्सर्वान्मुनयस्ते
निजेश्वरम् ॥ अस्तुवन्नरसमनसः पुलकांचितविग्रहाः ॥२६॥ नमो नमस्ते कृपणाय वासुदेवाय ते प्रभो ॥ नारा
यणाय मुनये स्वामिने धर्मसूनवे ॥२७॥ भगवन्नद्य पूर्वं त्वमस्माभिस्त्वं तु विग्रहे ॥ योऽस्य स्वामी स एवासि
कृष्णो राधारमापतिः ॥२८॥ ये त्वेते तव पार्श्वस्था देवा देव्यश्च संततम् ॥ न जानीमो वयं स्वामिन्मनोनयनने
दनाम् ॥२९॥ श्रुत्वेति ते तेषां वचनं प्रोवाच भगवान्सतान् ॥ धर्मदेवोत्थ यं साक्षाद्भक्तिरेषाऽस्य च प्रिया ॥३०॥
एताश्च धर्मपत्न्योऽस्याः श्रद्धा मैत्री दयादयः ॥ शुभप्रसादप्रमुखा आसां पुत्रा इमेऽनघाः ॥३१॥ दिव्यदेहा इमे

॥ स॰ जी॰ प्र॰ १ नित्यं वर्त्तते हि मद्भक्तिके ॥ ईदृग्रूपदर्शनमिव दुर्लभं तेह्यदीक्षणाम् ॥ ३२॥ एकान्तिकास्तु ये भक्तास्ते कञ्चित्तु अ॰ ५२॥
॥ ४०॥ मदिच्छया ॥ पश्यन्त्येतान्हि मुनयो न तु सर्वे निजेच्छया ॥ ३३॥ युष्माभिरेकादशीकाव्रतं जागरणान्वितम् ॥
क्रियन्ते यच्च पाल्यन्ते धर्मा एकान्तिनामपि ॥ ३४॥ अतोऽहं मांभिः सहैवेत्र सन्तोऽस्मीति दर्शनम् ॥ दत्तमीदृग्वि
रः सन्त्वदेहान्कामकं तु दम्॥ यदा तदानूपवसेत्त्यागवानेकवासरम्॥३९॥ प्रायश्चित्ते तु हिंसायाविशेषो
ऽत्र च विस्तृतः॥ धर्म्मशास्त्रात्तु ते योदिज्ञात्र मिह सूच्यते॥४०॥ मत्कुणं मक्षिकां यूकां शाजभं तमर्म्मं
च वा॥ जीवमन्यं तु हिंसाच्चेत्क्वचित्त्यागिजनो धिया॥४१॥ अष्टाक्षरं तदा मंत्रं जपेदष्टोत्तरशतम्॥ एतद
न्यान्नं नोत्तुना ज्ञानामीत्तु रेहरेः॥४२॥ चरकारबुद्धिरेकादिस्थूलजन्तोस्तु हिंसने॥ अज्ञानादपि संजा
ते कार्य्यमेकमुपोषणम्॥४३॥ इत्यंजीवेषु निश्चितताः तत्र्यं ततः तु मानं॥ यथार्हं वर्द्धयेत्त्यागी हिंसानि
कृत्युपोषणम्॥४४॥ सूर्य्योदये च दिवसे सूर्य्यास्तसमये तथा॥ निशायाञ्च प्रमादेन कुर्य्यादेकमुपोष
णम्॥४५॥ एतेषां त्यागिनां मध्ये यस्तु रात्मनिवेदिनः॥ तेषां धर्म्मविशेषो यस्तं मुने कथयामि ते॥४६॥ रू
पयत्यावयोमत्या सदृसीमुखदर्शने॥ अज्ञानतोऽपि संजाते कर्त्तव्यं नैरुपोषणम्॥४७॥ आध्ययानेम

॥स॰जी॰च॰ जीर्णगोलानकालेऽन्नपानवने॥ अन्नानां स्त्रीमुखेक्षायां नास्ति तेषामुपोषणम्॥४८॥ फले पत्रे तृणं जलं वा ॥अ॰६६॥
॥१३५॥ पिनेत्युरूल्पानि वेदितम्॥ नभक्ष्यं नैव पेयं च तेषामित्यपि कैं मतम्॥४९॥ बालवृद्धार्त्तयष्टिकहरिमंदिर
कर्म्मणाम्॥ एकभुक्तदिवास्वापनियमस्त्यागिनो नहि॥५०॥ इतिमानजयोपाप्यथावत्परिकीर्त्तिताः
सज्जं द्वविष्णुभक्तिर्न्योसहर्दे नेष्युः फलप्रदा॥५१॥ जीवादिपंचकस्येत्थं दोषात्तन्याशनमपि च॥ उपायाये
चतेसर्वे कथिताः शिष्टसंमताः॥५२॥ प्रायश्चित्तमनुक्तं स्यात्यस्यास्तु नियमच्युतेः॥ तस्याप्युपोषितं कार्यं स
तः पृष्ठेव वेदमवान्॥५३॥ प्रायश्चित्तोपवासेषु न प्राप्तमितरज्जातु॥ अनातुरोऽस्त्र एकले न पिबेदाप्यपिवृ
रुपः॥५४॥ सुधापर्यंतउपवासश्चेदेकादश्यापयुपोषणे॥ प्रातः स्नानर्हितं कुर्यात् तृतीयेवासरे पृथक्॥५५॥ ए
वं द्वित्रोपवासेषु प्रायश्चित्तार्थके यपि॥ व्रतोपवासो नोगएषः कार्य्यः स्त्यागिना पृथक्॥५६॥ प्रायश्चि
त्तोपवासेच क्रियमाणेपुनर्यदि॥ आपतेदुपवासोऽन्यः कुर्यात्तं त्रेणनंतदा॥५७॥ भुक्ते रन्ने तरं जाते विवी
क्षणादौतु पोषितः॥ नाममंत्रं जपेद्दिव्योः सर्वो तु स्नानमाचरेत्॥५८॥ प्रायश्चित्तेनशुद्धेयः पुरुषं तदहा
र्द्धिकंजनम्॥ कविरूपास्तु चरेद्दिनमेकमुपोषणम्॥५९॥ वैष्णवे चन्द्रियमा तोते यावद्दहस्मृतिर्भवेत्॥ स्वस्थ
व्यस्त्यागिभिर्नैव तत्त्वावकालमतंद्रितैः॥६०॥ यएते त्वनियमैः प्राग्वननियमश्चेत्पराजनम्॥ नियये स्वैव पच्यंते ॥१३५॥

मूत्वात्ते त्यागिनः किल॥६१॥ आर्त्तनादानथ कुर्वंतो भुक्त्वा ते यातनाश्चराम्॥ स्वानः स्वरा वा लापे ते भुवि वा
नराद यः॥६२॥ एतान्नाश्रित्य सद्धर्मान् त्यागं वैराग्यसंयुतान्॥ भजेयुर्ये वासुदेवं प्रोक्ता एकांतिनो हि ते
६३॥ प्रोक्ताः परमहंसास्ते जीवन्मुक्ता शुभसात्वताः॥ महाभागवताः संतः साधवो ब्रह्मवेदिनः॥६४॥ तेषां
देहस्तु पञ्चत्वं गतं धं पुण्यादपुजं कृतः॥ स्थापनीयो गिरे ईर्ष्यामहारण्येथ वा जनेः॥६५॥ अग्नुवा होऽग्निदा
घोवा देशाकाल्यानुसारतः॥ कर्तव्योरोदनं नैव कार्यं प्राकृतजीववत्॥६६॥ भक्तिर्न्नारायणे तैः शुद्धधर्म
स्ता न विरक्तिभिः॥ महाऽन्नमेव कर्त्तव्यास्त्यागिभिर्न्नि समादरात्॥६७॥ तत्रोदितास्ते मुनिवर्य्यधर्मायेस्त्या
गिनां भक्तिमतां हितास्ते॥ वराम्यया भ्युद्वयसंस्तुतानित्ता नादिजवश्या एपपिसंविनन्न॥६८॥ इतिश्रीस
त्संगिजीवने नारायणचरित्रे धर्मशास्त्रे चतुर्थप्रकरणे त्यागिधर्मे शुभानदोषनक्षयोपायनिरूपणनामा
६६॥ श्रीनारायणमुनिरुवाच॥ नानादुःखविकाराढ्यो यो यं देहोऽस्ति देहिनाम्॥ आ
त्मा ततोऽस्ति भिन्नो वै निर्विकारः सुखात्मकः॥१॥ अच्छेद्योऽसावभेद्यश्च निसीऽजः शाश्वतोऽक्षरः
॥ देहेंद्रियांतःकरणदेवताऽसुप्रकाशकः॥२॥ नक्लेद्यतेऽम्बुनासौ दह्यते नच वह्निना॥ नशुष्यते वा
युनापि निर्लेपश्चाच्च जोमतः॥३॥ पञ्चात्मनि गुणाः संति देहादौ न तु संति हि॥ देहादो येच दोषास्ते न सं

तान्नमति कर्हिचित् ॥ ४ ॥ एवंभूतं स्वमात्मानं ज्ञात्वा तस्याक्षरेण तु ॥ सच्चिदानंदरूपेण ब्रह्मणैक्यं विभाव
येत् ॥ ५ ॥ एवात्मनिष्ठा सुदृढा ज्ञानमित्युपवर्णितम् ॥ वैराग्यस्याथ वक्ष्यामि लक्षणं साधुसंमतम् ॥ ६ ॥
स्वरूपमाद्यो देहस्य ज्ञेयं स्वस्य परस्य च ॥ चर्मपेशीमलैरेव मिश्रं ज्ञात्वा स्थितिं ततः ॥ ७ ॥ त्वङ्मांसरुधि
रस्नायुमेदोमज्जास्थिखण्डकैः ॥ मलमूत्रैर्जरारोगैर्जन्तुदुष्टैर्देहैः च किं शुभम् ॥ ८ ॥ कृमिविड्भस्मसं
ज्ञान्तिराजनाम्नोपि यस्य च ॥ तस्मिन्सक्ता जना नैव मुकुन्दे स्युश्चतुर्विधान् ॥ ९ ॥ शुभाशुभाभिरू
क्ताप्य देहैः कर्माणि मानवाः ॥ ऊर्ध्वाधो वा मध्ये वा संसरंति पुनः पुनः ॥ १० ॥ यातना नारकीस्तीव्राः प्रा
प्नोत्यशुभकर्मणा ॥ पशुपक्षिसकीटादिनीचजन्मानि चावशः ॥ ११ ॥ शुभेन कर्मणा क्वापि जन्मं ते
नृभिपालताम् ॥ क्वापि पाताल सौख्यानि स्वर्गसौख्यानि च क्वचित् ॥ १२ ॥ सुखान्येतानि सर्वाणि वर्त्ते
तेन क्षराणि हि ॥ कामक्रोधभयेर्ष्यादिदुःस्पर्शैर्दोषैर्निभृतानि च ॥ १३ ॥ दिने ब्रह्मण एकस्मिंश्चतुर्दश सुरा
धिपाः ॥ नश्यंति क्षीयते सोपि सविराड्ब्रह्मकृते लये ॥ १४ ॥ यत्किंचिदस्ति प्रकृतिप्रकृतिपुरुषाभ्यां समुद्भ
वम् ॥ स्थावरं जंगमं वा तत्सर्वं कालग्रस्यं विद्यते ॥ १५ ॥ इत्थं दुःखं च दुःखत्वं मिथ्यात्वं ज्ञात्वाखिलस्य च ॥ अना
सक्तिः स्वदेहादौ यात तद्वैराग्यमुच्यते ॥ १६ ॥ वासुदेवावतारेषु माहात्म्यज्ञानपूर्विका ॥ स्नेहेन सेवानुवृत्तिर्या



सा भक्तिरिति कथ्यते ॥ १७ ॥ श्वेतद्वीपे ब्रह्मपुरे गोलोकेऽपि च धामनि ॥ वैकुंठादौ यदैश्वर्यं दिव्यं दिव्याश्
च पार्षदाः ॥ १८ ॥ सेवायामनुगाः कारे हरेस्तद्विद्यतेऽखिलम् ॥ दिव्यभावेनेति बोधो माहात्म्यज्ञानमुच्यते
॥ १९ ॥ इति ज्ञात्वैव नवभिः प्रकारैः श्रवणादिभिः ॥ सेवनं तस्य यत्प्रेम्णा तत्प्रोक्तं भक्तिलक्षणम् ॥ २० ॥
ज्ञानवैराग्यसहितां भक्तिमेवंविधां तु ये ॥ हरौ कुर्युः स्वधर्मस्थास्ते तु भक्तोत्तमा मताः ॥ २१ ॥ सन्तोऽथ ई
दृशा लोके प्रोक्ताः सद्गुरवो हिते ॥ येषां दर्शनमात्रेण नश्यते सर्वपातकं ॥ २२ ॥ तेषामेवाश्रयात्पुंसः कर्म
भिर्न्नाप्यते भवे ॥ निःश्रेयसं न वेदे च भक्तानां धर्मचारिणाम् ॥ २३ ॥ एत एव ततः संतः सेवनीयाः मुमु
क्षुणा ॥ इत्थं चैषां विधातव्यः सद्गुणानां महात्मनाम् ॥ २४ ॥ प्रवृत्तश्च निवृत्तश्च धर्मो द्विविधो मतः ॥ द्व
योपि विदुसंबंधाद्भवल्यैकांतिकस्त्वितः ॥ २५ ॥ निवृत्तधर्मैकांतित्वं प्रापुर्हंसनकादयः ॥ प्रवृत्तधर्मै
कांतित्वं मरीच्याद्यास्तथा ध्रुववत् ॥ २६ ॥ एकान्तेनैव धर्मेण मुक्तिरात्यन्तिकी मता ॥ न केवलं निवृत्ते
न धर्मेणापीतरेण वा ॥ २७ ॥ स्वरूपमस्य धर्मस्य कथ्यते चाधुना स्फुटम् ॥ चिदचिद्भिरविड्दैश्च विना हरिस
माश्रयम् ॥ २८ ॥ जीवतराणां चवात्यानां कारणानां स्वभावतः ॥ नैरंतर्येण सक्ताः स्युर्द्विधा वाखिलवृत्तयः
॥ २९ ॥ ततः पुमान्प्रवृत्तं वा निवृत्तं कर्म वैदिकम् ॥ कुर्याद्यदिहसंनिष्कामं ज्ञानवैराग्ययुक्तयत ॥ ३० ॥ स एवे

॥स.जी.च० कोऽनन्तस्तु को धर्मो निःश्रेयसप्रदः ॥ नहृत्तस्तु रुपायेते प्रोक्ता एकान्तिका बुधैः ॥ ३१ ॥ स्वधर्मादियुता नन्य अ०३२॥
॥१२७॥ भगवद्भक्तिलक्षणाः ॥ एष धर्मो हि निवृत्तीस्यान्मसत्त्वे सुदुर्दरः ॥ ३२ ॥ धारकाः स्युर्यदा त्वस्य तदा प्रादुर्भव-
त्यसौ ॥ न भवन्ति यदा ते च तिरोभवति वै तदा ॥ ३३ ॥ सा साक्षाद्भगवतः सेव्यान्तद्भक्तानां च वेदशास्त्र ॥ धर्मोऽत्रै-
कान्त एषोऽत्र प्राप्यते नान्यथा क्वचित् ॥ ३४ ॥ भवेदेष यदा यत्र तदा तत्र कृतं युगम् ॥ न वेदेव न तु त्रेता द्वापरं न
कलिर्न च ॥ ३५ ॥ तमेव धर्ममाश्रित्य गृहिभिर्भजनं हरेः ॥ इज्यन्ते तैरहिंसैस्तु विधानं च यथाविधि ॥ ३६ ॥ ए-
कान्तधर्ममाश्रित्य परस्त्यागिभिर्हरिः ॥ ब्रह्मसत्रैर्योगयज्ञादिभिर्मुनि ॥ ३७ ॥ तेषु यज्ञेषु ये देवास्तदी-
यत्वेन तेऽखिलाः ॥ भाव्य पिता ऽन्यर्च्चनीया न तु कार्या पृथग्मतिः ॥ ३८ ॥ एकान्तिनो ये ऽभवा पैते स्त्का भोति
कामिह ॥ देहान्ते ब्रह्मवादिब्रह्मनूर्गो जो कं धाम यान्ति हि ॥ ३९ ॥ एकान्तस्य धर्मस्य लक्षणं कथितं स्फुटम् ॥
तपांस्युग्राणि यस्त्रासे च कुः पूर्वं महर्षयः ॥ ४० ॥ तस्मान्मुमुक्षुरिच्छेद्यः श्रेयश्चात्यन्तिकं सतु ॥ एकान्तधर्मं
सेवेत मुक्तः स्यात्संसृतेस्ततः ॥ ४१ ॥ पुरापि ये ये संप्राप्ता मुक्तिं प्राप्संतिके जनाः ॥ ते प्यनेनैव धर्मेण प्राप्ता
नत्वन्यसाधनैः ॥ ४२ ॥ पाजयंस्त्व मिमं धर्मं त्यागिनोऽस्मान्मदाश्रितान् ॥ तथैव वर्तयः सर्वान् समर्थोऽसि
यतो मुने ॥ ४३ ॥ धर्मामृतमिदं पुण्यं सेवेरन्ये ऽत्र सज्जनाः ॥ कालमर्पनयं तेषां संसृतिः स्यान्न कर्हिचि- ॥१२७॥

त् ॥ ४४ ॥ इति परमपवित्रं सर्वदा सेवनीयं निपुणमतिमहद्भिः सर्वसंतापहारी ॥ सरसमिह पिबन्ति त्यागिधि-
र्मामृतं ते जननिमृतिभयमुक्ता धाम यान्ति विभोः ॥ ४५ ॥ सुव्रत उवाच ॥ इत्युक्तमाश्रुत्य स साधुधर्मं वृन्दं
सदीशी न मुनिः प्रसन्नः स्वयं तथैवाः न घ वर्त्तमानी त्यावी वृत्त त्यागिजनां श्च सर्वान् ॥ ४६ ॥ इति श्रीसत्संगि-
जीवने नारायणचरित्रे धर्मशास्त्रे चतुर्थप्रकरणे त्यागिधर्मप्रज्ञानादिलक्षणनिरूपणनामा सप्तविं-
शमोऽध्यायः ॥ ६७ ॥ कृपासिंधुः श्रीमान्विगतगणनांऽशेषवजया च यस्यादेयं च त्वा प्रकृतिपुरुषस्यापि महतः
॥ यदृशी शीभक्तावन्न निपुविधर्मास्त्वयय यितुं निजैकान्ते ॥ धर्मदिशतु समतिमे मुनिपतिः ॥ १ ॥ अज्ञानामृत-
पानेनातर्पयच्छोनितान् थितान् ॥ श्रीहरिधर्मतनयं तं वेदे पुरुषोत्तमम् ॥ २ ॥ सुव्रत उवाच ॥ एकदाऽथ हरिं
राजन्नित्यानन्दो महामुनि ॥ तदग्नतउपविश्य स्तं नत्वा ऽपृच्छत्कृताञ्जलिः ॥ ३ ॥ नित्यानन्द उवाच ॥ कृते ज्ञाना-
न्न मुक्तिः स्यादित्यस्ति न गावल्कृतिः ॥ ज्ञानं तत्कृपया मत्यं वक्तुमर्हसि निश्चितम् ॥ ४ ॥ सुव्रत उवाच ॥ इति
पृष्टः स भगवान्मुनिना तेन भूपते ॥ कथयामास तं ज्ञानं सांख्यशास्त्रविनिश्चितम् ॥ ५ ॥ श्रीनारायणमु-
निरुवाच ॥ ब्रह्मर्षेर्गर्वदारानेवदामि ज्ञानमञ्जसा ॥ येन मुक्तिर्भवेन्नॄणां शृणु त्वं मुनिसत्तम ॥ ६ ॥ आसी-
त्ति केऽज्यपि पूर्वं भगवानेक एव हि ॥ आसीज्जवयं वासुदेवः स्वकीये ऽक्षरधामनि ॥ ७ ॥ महानुमान्महामा

॥श्री॰गी॰टी॰
॥२३०॥

यास्तु हैवानंतकोटिभिः ॥ प्रधानपुरुषैस्तस्य प्रकाशोऽस्य पतीतदा ॥ ८ ॥ स श्रीकृष्णो दिव्यमूर्त्तिः प्रोच्यते पु अ०६९॥
रुषोत्तम ॥ परमात्मा परं ब्रह्म विष्णुर्नारायणः प्रभुः ॥ ९ ॥ सोऽतिरूपोऽस्य रानीतो हृषिश्च परमः पुमान्
॥ प्रोक्तः सएव वेदेषु पुराणेषु च भारते ॥ १० ॥ सिसृक्षाभूद्यदा तस्य ब्रह्मांडानां तदा सतु ॥ प्राबोधयच्चे
क्षणेन महाकालात्मपुरुषम् ॥ ११ ॥ येनानिर्वाचास्ते रंब्रह्म प्रवदंति नरे मुने ॥ अनेककोटि ब्रह्मांड जन्मस्थि
तेन कारणम् ॥ १२ ॥ पुरुषेणात्मभूतेन महामायां च तेन सः ॥ प्राबोधयद्वासुदेवो वीक्षयांदुसिसृक्षया
॥ १३ ॥ प्रबुद्धया तया मायाकं प्रभोस्तस्येच्छयैव स ॥ बहुकालं स्मरमते महाकालो हि पुरुषः ॥ १४ ॥ स तस्यां ग
र्भमाधत्त बहुकालं दधौ च सा ॥ ततः प्रधानपुरुषास्त्वासृतानेककोटिशः ॥ १५ ॥ प्रधानानां च या पुत्रा यो
गेनैवांडकोटयः ॥ रचयावासुदेवस्य जायंते स्मत्यनेकशः ॥ १६ ॥ रमणस्य च मेतेन स्थितो नु पुरुषांगतः
॥ बभुव नारसंज्ञं यद्ब्रह्मांडे षाप्रयंकिः ॥ १७ ॥ प्रकाशानंदरूपं तद्यस्मैकेनापि बिंदुना जीविताः ॥ मुनि
नः संतिनैकब्रह्मांडगोवासिनः ॥ १८ ॥ संगोस्वनेजजे तस्मिन्जनेन सनरस्ततः ॥ आपो नारा इति श्रुता ना
रायण इतीर्यते ॥ १९ ॥ कृष्णस्य प्राक्षरात्माः सा च व्यक्तः प्रकृतेः परः ॥ अप्रमेयश्च विबुधैर्महापुरुष
उच्यते ॥ २० ॥ ध्यानस्य प्रभोस्तस्य पादसंवाहनं तदा ॥ दिव्यमूर्तिर्महामाया करोति प्रीणयन्स्वमुम् ॥ २१ ॥२३०॥

वासुदेवः स च स्वामि भूतस्य ज्ञानादिशक्तिभिः ॥ तेषु सर्वेषु चान्वितोऽस्ति व्यतिरिक्तोऽस्ति च स्वतः ॥ २२ ॥ ब्रह्मा
ण्डानां समुत्पत्तिर्भवत्येवं हरीच्छया ॥ उत्पत्तिरीतिं कथये तत्रैकस्मादितो मुने ॥ २३ ॥ अधिष्ठाता प्रधान
स्य पुरुषो योऽक्षरोद्भवः ॥ अनादिनिधनो देवः स्वरेशः समुच्यते ॥ २४ ॥ योऽन्वयव्यतिरेकाभ्यां देहे च
प्राकृतादिषु ॥ ईश्वरस्यात्म पुरुषैधिष्ठितेऽवस्थितोऽस्ति च ॥ २५ ॥ सगुणब्रह्मसंज्ञो सोऽसिसृक्षुः पुरुषो
जगत् ॥ कालकर्मस्वभावं च प्राप्तोऽसौ हरीच्छया ॥ २६ ॥ ईक्षणं वीर्यमाधत्ते महापुरुषवीक्षितः ॥ पुरु
षः स प्रधानाख्य प्रकृतौ तैः समन्वितः ॥ २७ ॥ पुरुषाधिष्ठितेनाथ प्रधाने त्रिगुणात्मके ॥ प्राप्नुवंति गुणाः
क्षोभं कालेनैवादितस्त्रयः ॥ २८ ॥ परिणामस्वभावेन ततस्तेषां च जायते ॥ महत्तत्त्वस्य जननं जायते ते
न कर्मणा ॥ २९ ॥ सूक्ष्म गुणत्रयं तेऽत्र तत्त्वोऽयमनेः प्राकृताभिधम् ॥ अयूटकरपादादिवपुरीशस्य चाद्विमम्
॥ ३० ॥ तदात्मा पुरुषो यश्च स ईश्वर इतीर्यते ॥ विस्तरेणैव संप्रोक्तः श्रीमद्भागवते त्वसौ ॥ ३१ ॥ उद्बुद्धस्त्व
सत्वादित्रिगुणा प्रकृतिस्तु सा ॥ तदा सत्त्वगुणाद्वारा महत्तत्त्वं प्रसूयते ॥ ३२ ॥ प्रकाशरूपं ज्ञातं च कूटस्थं ज
गदंकुरम् ॥ ज्ञानक्रियात्मांशक्तिमान्चित्तं सत्त्वं च यद्विदुः ॥ ३३ ॥ यदंशात्साक्षाद्भगवतः शांते सत्त्वगुणं श्रुति
अविकारीति च प्रोक्तं वृत्तिभिश्चित्तलक्षणम् ॥ ३४ ॥ प्रभुशांतिर्यस्य याणां तं सर्वजंतुषु ॥ समहाप्राण

॥ स॰ जी॰ च॰ रस्याऽरूप्यंत तत्त्वमिहोदितम् ॥ ३५ ॥ अथ मायाकालकर्मस्वभावैश्च विकुर्वतः ॥ महत्तत्त्वादहंकारः सह प्र॰ ६८ ॥
॥ १३५ ॥ स्वरूपेण जायते ॥ ३६ ॥ ज्ञानशक्तिः क्रियाशक्तिर्द्रव्यशक्तिश्च स त्रिधा ॥ वैकारिकस्तैजसश्च तामसश्चेति क
थ्यते ॥ ३७ ॥ त्रिगुणोऽसावहंकारस्तत्त्वेन महता सह ॥ सूत्राभिधानमीशस्य द्वितीयं वपुरुच्यते ॥ ३८ ॥
ईश्वरोऽव्याकृतात्मा च वपुषस्तस्य योगतः ॥ हिरण्यगर्भसंज्ञां द्वितीयां लभते पुनः ॥ ३९ ॥ सर्वेषाम
पि जीवानां शरीरैः सूक्ष्मकारणैः ॥ सूत्राख्येऽत्रैव वपुषि विलीने भवतस्तदा ॥ ४० ॥ स्ववाय्वग्न्यप्पृथिव्यश्च स्थूली
नास्तस्मिन्तदास्थिताः ॥ शब्दः स्पर्शो रूपरसौ गंधश्चापि विनश्च ॥ ४१ ॥ यदैतल्लोममाप्नोति कालशक्त्या॰
दिभिर्दूरे ॥ तदानंत्र स्थिता जीवाः संचितानादिकर्म्मणाम् ॥ ४२ ॥ परिपक्वदशां प्राप्य स्वस्वकर्मानुसारतः
॥ तिष्ठंसं स्फुरितास्तत्र विराजो यन्निर्वृते ॥ ४३ ॥ अव्याकृतात्मा पुरुषो यया सूत्रात्मयोगतः ॥ हिरण्यगर्भ
संज्ञां लभतेऽसौ तथा मुने ॥ ४४ ॥ हिरण्यगर्भो यद्योगाद्वैश्वानर इतीर्यते ॥ एतावता न तद्भेदो यतोऽसावेक
एव हि ॥ ४५ ॥ ब्रह्मांडसर्गस्त्रिगुणात्मकाद्वै तस्माद्यथाऽऽस्त्रिगुणात्मकोऽसौ ॥ तथैव तुभ्यं मुनिवर्य तत्त्व
जस्योक्तिः सर्वे कथयामि बुद्धौ ॥ ४६ ॥ इति श्रीसत्संगिजीवने नारायणचरित्रे धर्मशास्त्रे चतुर्थप्रकरणे ज्ञानो
पदेशे पौरुषसर्गनिरूपणनामा ॥ ६८ ॥ श्रीनारायणमुनिरुवाच ॥ वैकारिकादहंकारा ॥ १३५ ॥

च्चैव जायते मनः ॥ काममध्यसंभवो यस्य संकल्पाच्च विकल्पनात् ॥ १ ॥ धैर्यं तपोपपत्तिश्च यक्तिर्भ्रांति
श्च कल्पना ॥ क्षमा सत्त्वममत्वं च शीघ्रतेति मनोगुणाः ॥ २ ॥ कार्योत्पत्तौ हि सर्वत्र मायाकालश्च कर्म
च ॥ स्वभावरक्षणं पुंसो हरिरिच्छेति हेतवः ॥ ३ ॥ देवता इंद्रियाणां च जाता वैकारिकाद्दश ॥ दिग्वातार्क
प्रचेतोऽश्विवह्नींद्रोपेंद्रमित्रकाः ॥ ४ ॥ विषयाणामिंद्रियाणां विनागेनाभिर्व्यंजनम् ॥ कुर्वंति देवतान्
नैदिग्राद्याश्च पृथक्पृथक् ॥ ५ ॥ दशेंद्रियाणि बुद्धिश्च ब्रह्मसा प्राणश्च तैजसात् ॥ कालादिभिरहंकारादसद्य
तैर्विकुर्वतः ॥ ६ ॥ श्रोत्रं त्वग्रसना घ्राणं ज्ञानेंद्रियाणि हि ॥ कर्मेंद्रियाणि वाक्पाणि चरणोपस्थपाय
वः ॥ ७ ॥ श्रवणादिक्रियासिद्धौ करणत्वं तु लक्षणम् ॥ श्रोत्रादीनामिंद्रियाणां विज्ञातव्यं पृथक्पृथक्
८ ॥ इंद्रियानुग्रहः स्वापः संशयो निश्चयः स्मृतिः ॥ मिथ्याज्ञानं ज्ञानचिंता धारणेति धियो गुणाः ॥ ९ ॥ तै
जसस्य पृथक्कार्यं केचिन्नेच्छंति कापिलाः ॥ सात्त्विकात्तामसाज्जातं यत्कार्यं तस्य तद्विदुः ॥ १० ॥ तामसा
च्च विकुर्वाणात्सूक्ष्मैः स्वैरेव हेतुभिः ॥ शब्दो भवति तस्माच्च नभः शब्दगुणं किल ॥ ११ ॥ विकुर्वतश्च तस्मात्स्पर्शो
जायते पूर्वहेतुभिः ॥ ततो वायुः स्पर्शगुणः शब्दवांश्च परान्वयात् ॥ १२ ॥ वायोर्विकुर्वतो रूपं तेजस्तस्माच्च जा
यते ॥ ततो रूपगुणं शब्दस्पर्शवच्च परान्वयात् ॥ १३ ॥ तेजसोऽथ रसस्तस्माज्जायते सोऽविकुर्वतः ॥ परान्वया

च्छब्दस्पर्शौ रूपवद्द्रवत्वतः ॥ १४ ॥ अग्नेर्भवो जायते गंधस्ततो गुणाधरा ॥ शब्दस्पर्शौ रूपरसगुणैर्युक्ताप 
शब्दयात् ॥ १५ ॥ शब्दादयो गुणाः पंचतन्मात्राख्या इहोदिताः ॥ आकाशादीनि भूमहान्तान्युक्तानि पंच
च ॥ १६ ॥ एकद्वित्रिचतुःपंचसंख्याः संति गुणाः क्रमात् ॥ नभोनभस्वत्तेजोंबुपृथ्वीनां सर्वसंमताः ॥ १७ ॥ शब्द
स्पर्शरूपरसगंधानामिह लक्षणम् ॥ श्रोत्रत्वग्चक्षुरसनाघ्राणग्राह्यत्वमुच्यते ॥ १८ ॥ एषां दशानामन्येपि
प्रोक्ता व्यासादिभिर्गुणाः ॥ नाना युक्तीः समाश्रित्य संति तानपि कीर्तये ॥ १९ ॥ नागेंद्रियात्मधिष्ण्यत्वं छिद्र
तावदिदंतरम् ॥ आश्रयांतरशून्यत्वमव्यक्तत्वाविकारिते ॥ २० ॥ अप्रतीघातता चैव भूतत्वमिति तद्वि
दः ॥ आकाशस्य गुणानेतानाहुर्वायुगुणान्ब्रुवे ॥ २१ ॥ वाद्यस्थानं स्वनेतृत्वं नेतृत्वं द्रव्यशब्दयोः ॥ वीजनं
व्यूहनं प्राणिवर्गोक्षः शोष्यं च संभवः ॥ २२ ॥ आत्मत्वमिंद्रियाणां च गुणा वायोरुदीरिताः ॥ दुर्दर्शता तेजनं च
तापः पाकः प्रकाशनम् ॥ २३ ॥ रागश्च जाड्यं वैलक्ष्यं स्वप्रकृतिर्हिममर्दनम् ॥ क्षुधापिपासा शोकश्च ते
जसोऽग्नेर्गुणा मताः ॥ २४ ॥ शैत्यं संक्लेदः स्वर्वं च भौमानां स्नपनं तथा ॥ तापापनोदस्तृप्तिश्च सौम्यता स्नेहमा
र्दवे ॥ २५ ॥ आप्यायनं शमनं च स्वरूपत्वं चांबुनो गुणाः ॥ स्थैर्यं गुरुत्वं काठिन्यं शक्तिश्च प्रसवात्मना ॥ २६ ॥
संहारो धारणं धैर्यमाकाशादेर्विशेषणम् ॥ भावनं प्रसणाश्चेति पृथ्व्या उदिता गुणाः ॥ २७ ॥ अर्थो 

अथोऽद्रव्यलिंगं शब्दः स्मृतः सः स नैकधा ॥ षड्जादिभिस्वरूपैश्च तथासौ समधा मतः ॥ २८ ॥ वादित्राणां च गतादी
नां वृक्षादीनां पृथक् पृथक् ॥ शब्दाः संतीति बोद्धव्यं तथा स्पर्शोऽप्यनेकधा ॥ २९ ॥ उष्णः शीतः सुखो दुःख
स्निग्धो विशद एव च ॥ तथा खरो मृदुः श्लक्ष्णो लघुर्गुरुरितीरितः ॥ ३० ॥ रूपं षोडशधा प्रोक्तं शुक्लं कृष्णं त
थारुणम् ॥ नीलं पीतं कर्बुरं च स्थूलं सूक्ष्मं च वर्तुलम् ॥ ३१ ॥ ह्रस्वं दीर्घं सारुणं च मृदु श्लक्ष्णं च चिक्कण
म् ॥ चतुरस्रमिति ज्ञेयं रसः प्रोक्तस्तु षड्विधः ॥ ३२ ॥ मधुरो लवणस्तिक्तः कटुरम्लः कषायकः ॥ रस एको
पि संसर्गाद्द्रव्याणां बहुधा मतः ॥ ३३ ॥ गंधोपि बहुधा प्रोक्तः संसर्गद्रव्ययोगतः ॥ इष्टोऽनिष्टश्च मधुरो
निर्हारी संहतः कटुः ॥ ३४ ॥ स्निग्धो रूक्षश्च विशदः शांत उग्रोऽम्लरसोपि ॥ वदंतीत्थं लक्षणानि मुनयोऽन्ये
कयुक्तिभिः ॥ ३५ ॥ भूतेंद्रियाणि मात्राश्च मनो बुद्धिरहंकृतिः ॥ चित्तं चेति प्रकृतीः पंचविंशतिको गणः ॥ ३६
॥ अष्टस्वष्टुमनीशानितत्वान्येतानि तु स्वतः ॥ हरेः शक्त्यैव संहत्य मुने ब्रह्माण्डं सृजंति तत् ॥ ३७ ॥ एतद्देहं विशे
षात्संधपड्डुंस्तोयादिभिर्वृतम् ॥ एकैकस्माद्दशगुणैः प्रधानेनावृतं बहिः ॥ ३८ ॥ अनेकांडाश्रयेतीयेमहापुरु
षदेहजे ॥ अदृश्यमत्तद्वैरंशानि सर्गगोलकसन्निभम् ॥ ३९ ॥ हरीच्छा वशतस्तस्मिन् कालेन पुरुषो महान्
॥ भूत्वाभिव्यक्तविश्वात्मा मायाविक्षेपशक्तियुक् ॥ ४० ॥ प्रमितहानयवे धौतोकान्कल्पसंतिमनीषिणः ॥ काला

॥स॰जी॰च॰ शिनिरघः सप्त सप्तो द्वौ जघनादिभिः ॥४२॥ पादादिभिः स्मात्वयं वै पातालप्रमुखांश्चयः ॥ धृत्वापि लोका अ॰६५॥
॥१४१॥ सुरूपस्तत्र आस्ते स्वयं पृथक् ॥४३॥ सस्पृष्ट्वात्मनिवासाय कं गर्भोदकमं जितम् ॥ सहस्रशीर्षा पुरुषः
शेते जीवात्मभिः सह ॥४४॥ सुतस्यांगस्तु विराड्देहः सहस्रं परिविस्तरान् ॥ संपूर्णां गोभवत्सस्य सर्वलोकच-
द्धितेषिणः ॥४४॥ इंद्रियायतनेष्वस्य श्रीकृते पुदेवताः ॥ इंद्रियैः सहसंगस्तिष्ठंति प्रकटं तत ॥४५
॥ वैराजः पुरुषोऽप्येष आस्ते सामान्यतस्त्रिधा ॥ आध्यात्मिकश्चाधिदैवः साधिभौतिक एस्वपि ॥४६॥ अध्या
त्मस्विंद्रियेष्वेकस्तदात्माध्यात्मिकः पुमान् ॥ देवतास्वधिदैवेषु तदात्माप्याधिदैविकः ॥४७॥ गोजके ष
धिभूतेषु तदात्मा चाधिभौतिकः ॥ एते ब्रस्तलमानावै कर्तुं नस्रमते क्रियाः ॥४८॥ तथाक्षेत्रज्ञरूपेणास्वय
मास्ते विनिष्पतः ॥ सत्वात्मात्वाक्ष रोगरूपोऽन्येघोनमात्य इंद्रियैः ॥४९॥ महाप्राणेन सहितं धृत्वाध्यात्मा
दिकं त्रयम् ॥ स्थितः सर्वत्रतर्द्राणो विराड्देहाभिमानवान् ॥५०॥ चतुर्युगसहस्रं तु दिनं रात्रीश्च तावती
॥ वैराजपुरुषस्यास्मन् तत्र कल्प उच्यते ॥५१॥ कालकर्मस्वभावैश्च मायया नरहरीच्छया ॥ पुरुषप्रेरिता
दस्मात् हिरण्मयो जायते महान् ॥५२॥ इंद्रियैर्विषयैर्देवैः सहितात्रीवकोटयः ॥ आविर्भवंति वैराजाद्देवासुर
नरादयः ॥५३॥ वैराजपुरुषस्यांगादाविर्भवति राजसः ॥ प्रतिकल्पं जगत्स्रष्टा ब्रह्मा विश्वसृजांपतिः ॥५४ ॥१४१॥

प्रजाः सिसृक्षुरास्थाय स समाधिं प्रजापतिः ॥ सृजत्संगेषु तस्यैव जीवान् स्वानुवनानिव ॥५५॥ यथा यथा
चिंतयति ब्रह्मा स्वस्मा स्रजीजगत् ॥ तथा तथा भवत्स्वात्ततः स्रष्टेति स श्रुतः ॥५६॥ वैराजांगाद्विरा
ज्ञे वै न सर्वेषामपि देहिनाम् ॥ पातालप्रमुखा लोकाः सप्त तत्र संति संस्थिताः ॥५७॥ कुनित्वी लोकाश्च यं
पद्मं जन्मस्थाने स्वयंभव ॥ वैराजजठराकाशे प्रादुर्भवति नाभितः ॥५८॥ लोकाः सजीवा विधिनैव सृष्टा
वसंति सर्वे विततेऽत्र तस्मिन् ॥ पश्येत् तदानीं सनु पद्मकल्पः मोक्षः पुराणेषु हि सा ध्रुवयं ॥५९॥ इति श्री
सत्संगिजीवने नारायणचरित्रे धर्मशास्त्रे चतुर्थप्रकरणे ज्ञानोपदेशे अष्टं कारिकसर्गलक्षणनिरू
पणनामा ६९॥ श्रीनारायणमुनिरुवाच ॥ स्थावरजंगमा जीवास्तेषां स्थानानि वृत्त
यः ॥ वैराजाद्वसणः सर्गाः कालेषांति सर्युजवम् ॥१॥ जीवा ये यानि कर्माणि प्राक्कृतवंतो प्रतिपेदिरे ॥ तान्ये
व प्रतिपद्यंते सृज्यमानाः पुनः पुनः ॥२॥ सुकृतं दुष्कृतं वापि मिश्रं वा त्रिगुणात्मकम् ॥ भुक्त्वा न विनष्टं यत्क
र्म तदेवाशेषप्रपद्यते ॥३॥ तत्तत्कर्मानुसारेण देहं बुद्धिं च जीविकाम् ॥ स्थानं चाप्नोति तत्तस्य शेषं तेना
च संज्ञायः ॥४॥ इत्थं कर्मवशा जीवाः पुनः कर्माणि कुर्वते ॥ तेषां स्थूलास्तु ये देहास्ते तेषां पांचभौतिका
॥५॥ भूतानि पंच चान्योऽन्यं मिलितानि हरेरिच्छया ॥ तेभ्यो जातास्तु ये देहास्ते सर्वे पांचभौतिकाः ॥६॥ प्रथा

॥स.गी.च॥ नैतु महाभूतमेकं सर्वं वपुष्यपि ॥ चत्वार्यंशानि भूतानि गौणानि तु भवंति हि ॥ ७ ॥ पृथ्वीतत्वं प्रधानं च यत्र ॥अ०१०॥
॥१४२॥ तत्रापराणि तु ॥ संसृष्टकानि चत्वारि जलं तेजो मरुन्नभः ॥ ८ ॥ जलतत्वं प्रधानं च यत्र तत्रापराणि तु ॥ सं
सृष्टकानि चत्वारि पृथ्वी तेजो मरुन्नभः ॥ ९ ॥ तेजस्तत्वं प्रधानं च यत्र तत्रापराणि तु ॥ संसृष्टकानि च
त्वारि पृथ्वी तोयं मरुन्नभः ॥ १० ॥ वायुतत्वं प्रधानं च यत्र तत्रापराणि तु ॥ संसृष्टकानि चत्वारि पृथ्व्यंभस्
तेजसी नभः ॥ ११ ॥ नभस्तत्वं प्रधानं च यत्र तत्रापराणि तु ॥ संसृष्टकानि चत्वारि पृथ्व्यंभस्तेजसी मरुत्
॥ १२ ॥ जीवानां पारज्यादिदेहास्तेषां त्रयोकाश्च नादृशाः ॥ नादृशा एव तेषां च भोगाः सर्वेपि संति वै ॥ १३ ॥ मुख्य
भूतधरा देहाः स्थावरा जंगमास्तथा ॥ मुख्यभूतां च वै देहा जीवानां संति वारिणि ॥ १४ ॥ ये देवजीवके देहास्तु ते
जो मुख्या भवंति ते ॥ देहाः प्रधानमरुतो वायुलोके वसंति च ॥ १५ ॥ देहास्तु मुख्यवियतो त्र मंत्याकाशए व हि ॥
कर्माश्रित्य यात्रां यत्स सत्तारम्भमते वपुः ॥ १६ ॥ अमीनामिश्रभूतानां विकाराः पंच पंचधा ॥ पांचभौतिक
देहेषु तेषां सर्वत्र युक्तिभिः ॥ १७ ॥ तत्र त्वङ्मांसमज्जास्थिनाडीति क्ष्माःस्ति पंचधा ॥ श्लेष्मपित्तं च मास्वेदौ
रक्तं चेत्यंबु पंचधा ॥ १८ ॥ निद्रा तु तृड्जागरः क्षुत्कृष्णा तेजो हि पंचधा ॥ प्राणोऽपानो व्यानोदानौ समान पंच
धा मरुतः ॥ १९ ॥ श्रोत्रं घ्राणो मुखं कोष्ठहृदयं पंचधेति खम् ॥ एवं विकारा भूतानां देहेषु पंचविंशतिः ॥१४२॥

२० ॥ देहोयं स्थूलसंज्ञोऽस्ति मज्जमूत्रमयोऽशुचिः ॥ सर्वं धात्री वसत्याद्यास्तस्मिंश्चेमाः स्थिता हि नाम ॥ २१
॥ स्थूलदेहस्य मध्येऽस्ति जीवस्यान्यत्कलेवरम् ॥ प्राणेन्द्रियमनोबुद्धिसंघातः सूक्ष्मसंज्ञितम् ॥ २२ ॥ एकः
प्राणो वृत्तिभेदात्प्रोक्तः पंचविधः किल ॥ प्राणोऽपानो व्यानोदानौ समान इति नामभिः ॥ २३ ॥ नागः कूर्मः
कृकलो देवदत्तो धनंजयः ॥ इत्येते तस्य भेदास्तु संस्त्येते चैव संगताः ॥ २४ ॥ हृदि प्राणो गुदेऽपानः समा
नो नाभिमंडले ॥ उदानः कंठदेशस्थो व्यानः सर्वशरीरगः ॥ २५ ॥ प्राणः नागतिमान्स्तेपोऽपानोऽधोगति
रुच्यते ॥ भुक्तपीतान्नतोयादेः समानः साम्यकृन्मतः ॥ २६ ॥ उदान उत्क्रमणकृद्व्यानः सर्वांगचेष्टनः ॥ नाग
उद्गारकृत्कूर्मोन्मीलनकरः स्मृतः ॥ २७ ॥ कृकलः क्षुत्करो देवदत्तो जृंभणकृत्तथा ॥ धनंजयः पोषणकृन्मो
क्षः शोष्यविशारदैः ॥ २८ ॥ देवदत्तो मतः प्राणेऽपाने तु कृकलः स्मृतः ॥ धनंजयः समाने च कूर्मो व्याने
स्थितः स्मृतः ॥ २९ ॥ उदाने तु हि तो नाग इति पंचविधो लयः ॥ इंद्रियाणि दशोक्तानि बुधैस्तु लक्षणाम
पि ॥ ३० ॥ शृणुते येन तच्छ्रोत्रं स्पर्शं त्वक्कल्यते यया ॥ वीक्ष्यते येन तच्चक्षुर्जिह्वा ज्ञेया रसम् ॥ ३१ ॥
घ्रायते येन तद्घ्राणमुच्यते वाक्प्रपाचकः ॥ पण्यते येन पाणिः स्यात्पादो येन च पद्यते ॥ ३२ ॥ तद्गुदं स्यूयते येन
मेढ्रं मेहति येन च ॥ करणानि दशैतानि बाह्यानि कथितानि वै ॥ ३३ ॥ मनोंतःकरणं प्रोक्तं बुद्धिश्चापि तथा

॥ स॰ जी॰ च० ॥ विधा ॥ अहंकारस्तथा चित्तमित्यपि द्वयमिष्यते ॥ ३४ ॥ मनोबुद्ध्योरभेदं च केचिदिच्छन्ति पंडिताः ॥ मन- अ० ४० ॥
॥ १४३ ॥ सा संशयं जीवो बुद्ध्या वाप्नोति निश्चयम् ॥ ३५ ॥ अंतर्गते मनोबुद्ध्योर्मन्ये हंकृतिश्चित्तसि ॥ अहंता चेतनं
वाहंकारेण प्रोतिनेन सा ॥ ३६ ॥ एतत्सूक्ष्मवपुः प्रोक्तं वपुषीः स्थूलसूक्ष्मयोः ॥ अन्योन्याश्रयणात् स्थिति
सूक्ष्मयोस्तस्य कारणम् ॥ ३७ ॥ तच्चाविद्यामयं प्रोक्तं युक्तं संचितकर्मभिः ॥ वेधेनानादिना तेन जीवस्य
स्वबीजवद्धतः ॥ ३८ ॥ यथाङ्कुरस्य बीजेन धस्य नभावो व्यतिरेकतः ॥ तथा कारणदेहस्य जीवस्य न पृथक् स्थि-
तिः ॥ ३९ ॥ जाग्रत्स्वप्नसुषुप्तिश्च तिस्रोऽपि मिश्रगुणात्मिकाः ॥ अवस्था गुणसांकर्यात्ताः संति मिश्राः परस्पर-
म् ॥ ४० ॥ विराजः स्थितिरवस्था याः कार्यं सत्वगुणात्मिका ॥ नेत्रस्थानकृता वासा अवस्था जाग्रदितीरिता
॥ ४१ ॥ स्थूलदेहाभिमानेन विश्वसंज्ञस्य चात्मनः ॥ बाह्यान्तःकरणैः सर्वैः सविवेकं यथार्थतः ॥ ४२ ॥ श-
ब्दादिबाह्यविषयभोगः स्यात्पूर्वकर्मणाम् ॥ अनुसारेण तज्ज्ञत्वप्रधानं जाग्रदुच्यते ॥ ४३ ॥ अत्रेन्द्रि-
यान् भोक्तातुं केनीवी योग्यथार्थतः ॥ रजःप्रधानसत्वात्म जाग्रत्स्वप्नः स उच्यते ॥ ४४ ॥ भुंजान एव विष-
याञ्छब्दादीनपि जाग्रति ॥ शोकश्रमादिना विद्याद्विवेकाभावतो न चेत् ॥ ४५ ॥ तमःप्रधानसत्वात्मजा-
ग्रत्सुषुप्तं तदुच्यते ॥ विश्रान्तस्तु फलं दृष्ट्वा मुने जाग्रति कर्मणाम् ॥ ४६ ॥ ज्ञस्त्वविद्याभ्यासतोऽस्य सज्जन्त्वास्त ॥ १४३ ॥

प्रसंगतः ॥ एतद्भेदत्रयं ज्ञानं येन तुर्यं हितं सदम् ॥ ४७ ॥ त्रिभिर्भेदास्त्ववस्था या सुगुणानां या प्रधानता ॥ उ-
क्ता च वक्ष्यते सा तु तादृक्कर्मानुसारतः ॥ ४८ ॥ हिरण्यगर्भसोऽस्य वस्था कार्यंगजस्थितिः ॥ रजोगुणा-
त्मिका वस्था प्रोच्यते स्वप्नसंज्ञया ॥ ४९ ॥ सूक्ष्मदेहाभिमानेन तैजसाख्यस्य चात्मनः ॥ विनाऽप्यस्थिरभोग-
स्थिपूर्वकर्मानुसारतः ॥ ५० ॥ इंद्रियैर्मनसा बुद्ध्या यत्स्यात्प्रियाप्रिया ॥ रजोगुणप्रधानं तत्स्वप्न इत्यु-
च्यते परम् ॥ ५१ ॥ जाग्रतीव यदा स्वप्ने शब्दादीन् विषयानपि ॥ भुंक्ते जीवो विवेकेन ज्ञानन्स प्रोच्यते त-
दा ॥ ५२ ॥ सत्वप्रधानकरजस्त्वात्मक स्वप्नजागरः ॥ भुंजानोऽपि स्वप्नभोगान्वेत्ति जाड्येन तान्न सा ॥ ५३ ॥
तमःप्रधानकरजस्त्वात्मकस्वप्नसुप्तिका ॥ हिरण्यगर्भः फलदः स्वप्नेन वर्तिकर्मणाम् ॥ ५४ ॥ एतद्भेदत्रय-
ज्ञानं प्रबुद्धस्य यतो भवेत् ॥ तुरीयं तत्त्वदं प्रोक्तं परस्य कातरात्मकं सदा ॥ ५५ ॥ ईश्वरस्य जपावस्था कार्यं च तम-
आत्मिका ॥ हृदयस्थानगावस्था सुषुप्तिरिति कथ्यते ॥ ५६ ॥ बाह्यान्तःकरणानां च वृत्तयो भोग्यवासना-
॥ लीनाः कारणदेहस्य ज्ञानं कर्तृतालयाः ॥ ५७ ॥ तस्याभिमंतुः प्राज्ञस्य सगुणब्रह्मणो मुने ॥ सुखलेशो-
ऽस्ति जीनत्वं यज्ञासुप्तिस्तमोमयी ॥ ५८ ॥ कर्मसंस्कारतः कर्तृवृत्ते रुत्थानमत्र यत् ॥ स प्रोक्तो जागृत्स्वप्न त-
मोमय सुषुप्तिसम्भूतः ॥ ५९ ॥ जाग्रत्स्वप्नमवस्थाता वा विद्यासात्तत्र वै पुनः ॥ प्रातिलोम्यं कर्तृवृत्तेः सुषुप्ता

॥स॰गी॰च॰ नं तु तमप्ययत्॥६०॥ सत्वमुख्यतमो मर्त्यान्सुप्तौ तज्जागृदुच्यते॥ कर्मणां फलदातारं सुषुप्तावीश्वरो मतः॥६१॥ अ॰३०॥
॥१५५॥ एतस्मिंस्त्रयज्ञानं प्रबुद्धस्य यतोऽभवेत्॥ तुरीयं तस्य देशोक्तं ज्ञातव्यं सूक्ष्मया दृशा॥६२॥ सत्वगुणामप्यत्रव्यानां
भूतभूता गुणास्त्रयः॥ सत्वरजस्तमइति ज्ञातव्यास्तेपि लक्षणैः॥६३॥ सत्वमानंदउद्रेकः प्रीतिः प्राकाश्यमे
व च सुखसंगित्वमारोग्यं संतोषः श्रद्दधानता॥६४॥ अकार्पण्यमसंरंभः क्षमा धृतिरहिंसनम्॥ समता स
समानत्वं मार्दवं ह्रीरचापलम्॥६५॥ शौचमार्जवमाचारो लौल्यं हृद्यसंभ्रमः॥ इष्टानिष्टवियोगानां
कृतानामविकत्थनम्॥६६॥ दानेन चानुग्रहणमस्पृहत्वं परार्थता॥ सर्वभूतदया चैव सत्वस्यैते गुणाः स्मृताः
॥६७॥ नानारसेवा स्वैर्यं रूपमैश्वर्यं विग्रहौ॥ अत्यागित्वमकारुण्यं सुखदुःखोपसेवनम्॥६८॥ परापवादे
षु रतिर्विवादानां च सेवनं॥ अहंकारस्त्वसत्कारश्चिंता वैरोपसेवनम्॥६९॥ परितापोऽभिहरणं ह्रीनाशो
नार्जवं तथा॥ भेदः परुषता हिंसा कामः क्रोधो मदस्तथा॥७०॥ अक्षमा परिहासश्च असंतोषो हर्षराग एव च एते
गुणा राजसा हितामसानथ कीर्तये॥७१॥ तामिस्रमंधतामिस्रं तमो मोहो महातमः॥ कार्याकार्याविवेक
श्च प्रमादो ह्यव्यवसायम्॥७२॥ असमृद्धिस्तथा दैन्यं शोकस्तंद्रा विषादनम्॥ गंधवासो विहारेषु तुच्छेष्वनुराग
नैपुणं॥७३॥ दिवास्वप्नेऽतिनिद्रायां निर्वेदोऽभिरुचिस्तथा॥ नृत्यवादित्रगीतानामज्ञानां च श्रद्दधानता॥७४॥ दे ॥१५५॥

षो धर्मविशेषाणामेते वै तामसा गुणाः॥ एवं त्रयो गुणा ज्ञेया लक्षणैस्तु पृथक् पृथक्॥७५॥ स्थूलादि देह
त्रितयं सदाध्यात्माधिदैवतम्॥ गुणत्रयं तथा वस्था एतत्क्षेत्रमितीरितम्॥७६॥ यतस्तदेति सत्वात्माक्षे
त्रज्ञ इति कथ्यते॥ सामान्यसत्तया देहं स सर्वं व्याप्य वर्त्तते॥७७॥ विशेषसत्तया त्वास्ते हृदि क्षेत्रज्ञ एव तु
रत्नदीपप्रतीकाशो ज्ञाता सूक्ष्मोऽणुवद्ध्रुवः॥७८॥ क्षेत्रज्ञत्वेनेत्थमुक्तो मयात्मा सम्यग्वेत्तुं तत्स्वरूपं पुनस्ते
॥ अध्यात्मादिर्मोक्षधर्मप्रणीतं नेदं वच्मि श्रूयतां शुद्धबुद्धे॥७९॥ इति श्रीमद्भगवद्गीतावने नारायणचरित्रे ध
र्मज्ञानप्रचतुर्थप्रकरणे ज्ञानोपदेशे षोडशोऽध्यायः गुणलक्षणनिरूपणं नाम [illegible] ३०
श्रीनारायण उवाच॥ श्रोत्रमध्यात्ममित्युक्तं दिशास्तत्राधिदैवतम्॥ श्रोतव्यमधिभूतं तत्र पुमांस्तां
प्रपद्यते॥१॥ त्वगध्यात्ममिति प्रोक्तं वातस्तत्राधिदैवतम्॥ अधिभूतं तथा स्पर्शास्तत्रा मां विंदते पुमान्॥२॥
चक्षुरध्यात्ममित्युक्तमर्कस्तत्राधिदैवतम्॥ दृश्यमधिभूतं तत्र पुमांस्तां प्रपद्यते॥३॥ जिह्वाऽध्यात्ममि
ति प्रोक्तं वरुणोऽत्राधिदैवतम्॥ अधिभूतं रसश्चैव तत्रा मां विंदते पुमान्॥४॥ घ्राणमध्यात्ममित्युक्तं दस्रौ
तत्राधिदैवतम्॥ घ्रातव्यमधिभूतं च तत्रा मां विंदते पुमान्॥५॥ वागध्यात्ममिति प्रोक्तमग्निस्तत्राधिदैवत
म्॥ वक्तव्यमधिभूतं तत्र पुमांस्तां प्रपद्यते॥६॥ पाणी अध्यात्ममित्युक्तमिंद्रस्तत्राधिदैवतम्॥ आदानम

॥स॰जी॰प्र॰४॥ धिभूतं तत्सु मांस्ताभ्यां प्रपद्यते ॥७॥ पादावध्यात्ममित्युक्तं विष्णुस्तत्राधिदैवतम् ॥ गंतव्यमधिभूतं च तत्ता अ॰३१॥
॥२४५॥ भ्यां तद्विंदते पुमान् ॥८॥ पायुरध्यात्ममित्युक्तं मित्रस्तत्राधिदैवतम् ॥ अधिभूतं विसर्गोऽस्य तत्ताभ्यां विंद
ते पुमान् ॥९॥ उपस्थोध्यात्ममित्युक्तं प्रजेशोत्राधिदैवतम् ॥ आनंदस्त्वाधिभूतं तत्सु मांस्ताभ्यां प्रपद्यते ॥
१०॥ मनोध्यात्ममिति प्रोक्तं चंद्रस्तत्राधिदैवतम् ॥ मंतव्यमधिभूतं तत्सु मांस्ताभ्यां प्रपद्यते ॥११॥ बुद्धिर
ध्यात्ममित्युक्तं ब्रह्मा तत्राधिदैवतम् ॥ बोद्धव्यमधिभूतं तत्सु मांस्ताभ्यां प्रपद्यते ॥१२॥ अहंकारो ध्यात्ममि
ति रुद्रस्तत्राधिदैवतम् ॥ अभिमानोधिभूतं तत्सु मांस्ताभ्यां प्रपद्यते ॥१३॥ चित्तमध्यात्ममित्युक्तं क्षेत्रज्ञो
त्राधिदैवतम् ॥ चिंतनं चाधिभूतं तत्सु मांस्ताभ्यां प्रपद्यते ॥१४॥ अध्यात्मादिविभागोयं स्फुटं त्रेधा निरूपतः
तत्र देहकरणेशेष्वेतेयं कर्म्म तृतीयकम् ॥१५॥ सत्रिष्वेतत्समभावे कर्त्तुं न क्षमते क्रिया ॥ तथापि सच्चिदु
पोऽस्ति स्वयं तेभ्यः पृथक्स्थितः ॥१६॥ क्षेत्रज्ञो जीवरूपी यो हृदाकाशे प्रकाशवान् ॥ विशेषस्तस्य त्वात्मास्ति
व्याप्य साक्षात्मतीव पुः ॥१७॥ इंद्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः ॥ मनसस्तु परा बुद्धिर्या बुद्धेः पर
तस्तु सः ॥१८॥ देवप्रकाशिताश्चैभ्यो मयानुक्तानि तेंद्रियैः ॥ स्वस्वांतःकरणे वेद्योसौ नैवो व्यक्तिसमस्त्वयम् ॥
१९॥ सांख्यज्ञानमिति प्रोक्तं स्वरूपं देहिनो पृथक् ॥ पृथग्विज्ञायते येन मदस्मात्त्व यथातथा ॥२०॥ तानेनेतेना ॥२४५॥

त्मरूपं न यावद्भिन्नं विजानाति शरीरत्रयात्सः ॥ तावद्दृढो माययासौ याति साधीभूयो नृपः संसृतिं दुःखरूपाम्
॥२१॥ इति श्रीमत्सत्संगिजीवने नारायणचरित्रे धर्मशास्त्रे चतुर्थप्रकरणे ज्ञानोपदेशेऽध्यात्मादिविभागनि
रूपणनामा ॥ ३१ ॥ श्रीनारायणमुनिरुवाच ॥ एतेन सांख्यज्ञानेन कारणादिवपुस्त्र
यात् ॥ आत्मा तेयो पृथक्केशोऽव्याकृतादिवपुस्त्रयात् ॥१॥ तादात्म्येन ततः श्रीकृष्णं ब्रह्मणा स्वस्य भावयेत् ॥ ब्र
ह्मभूतस्ततो भक्त्या वासुदेवं भजेत् पुमान् ॥२॥ वर्णाश्रमोचितं धर्म्मं स्वाधिकारानुसारिणम् ॥ यावद्देहस्मृति
स्तावत्स्यात् यत्नेन भजेत्सदा ॥३॥ आश्रमाणां वर्णानामितरेषां च योषिताम् ॥ धर्म्मशास्त्रेष्वखिला धर्माः प्रो
क्ता स्थैर्यास्तु तेन तः ॥४॥ वासुदेवो हि भगवान्साक्षान्नारायणः प्रभुः ॥ मुमुक्षूणामुपास्योऽस्ति नाम्नस्त्वमि
निश्चयः ॥५॥ मदेवदेवोस्ति हिरण्मयवर्णो त्यशेषसौंदर्यनिकेतमूर्तिः ॥ एकैककेशेऽग्रे विधुकोटिकोटिप्रका
शान्तःस्मितोज्ज्वलकांतिमाली ॥६॥ सदा किशोरोवयसातिरम्यः पीतांबरोदिव्यसरस्वगंधः ॥ दोर्भ्यां चतुर्भ्यां प्र
स्फुरद्भिर्भूषणानिनादयन्नूपुरयोरभिपादः ॥७॥ किरीटकांचीवलयांगदाद्यैर्विभूषणैर्भूषितदंडवक्रः ॥ श्री
वत्सलक्ष्मीकविशालवक्षाः सरोजपत्रायतचारुनेत्रः ॥८॥ महार्हवस्त्राभरणोश्वधैर्यैर्हारैः स्त्रयाकेसरचंद
नाद्यैः ॥ संपूजितो राधिकया च लक्ष्म्या पद्योपनम्रावनतः करुणार्द्रदृष्ट्या ॥९॥ स्वयंभूतो वास्कदेवः स्वकीयहृदये

॥स॰गी॰च॰ वुने॥ मुमुक्षुणां चिंतनीयः स्मयमानमुखांबुजः॥२०॥ हृदये मानसैरेव कर्त्तव्यं तस्य पूजनम्॥ उपचा अ॰१४॥
॥१४६॥ रैर्बहुविधैः पुराणप्रथितैः शुभैः॥२१॥ प्रतिमाया तु हृदये ध्यातमावाह्य तं पुमान्॥ यथालब्धोपचा
रैश्च प्रसिद्धैः पूजयेत्प्रभुम्॥२२॥ पूजनानंतरं यथाशक्ति स्वस्थचित्तः समुत्सुकः॥ अष्टाक्षरं कृष्णमंत्रं जपेद्ध्या
यन् हरिं हृदि॥२३॥ श्रवणं कीर्त्तनं चैव स्मरणं पादसेवनम्॥ अर्च्चनं वंदनं दास्यं सख्यमात्मनिवेदनम्॥२४
॥एतैः प्रकारैर्नवभिः सेवते यस्तमादरात्॥ तस्य गाढं भवेत्प्रेम तस्मिन्नारायणे विभो॥२५॥ तस्य पुंसो भग
वति प्राणेंद्रियमनोधियाम्॥ निरोधो जायते यः सो सर्वथापि तमीक्षते॥२६॥ ततश्च स्वं ब्रह्मरूपमखं
डं शुद्धमक्षरम्॥ समीक्षतेऽथ तत्रैव विजसंततं प्रभुम्॥२७॥ यथा पुष्पादितत्त्वानामाधारोऽस्ति नभस्त
था॥ निःसंजीवेशप्रकृतिपुरुषाणां हि तद्दृढम्॥२८॥ सर्वाधारे तदाधारस्तस्मिन् ब्रह्मणि चाक्षरे॥ दिव्यमूर्तिः
स भगवान्वर्त्तते पुरुषोत्तमः॥२९॥ यथा वस्त्रस्वरूपं च मोतीरूपं स पश्यति॥ तमसौ भजते भक्तो ब्रह्मरूप
स्त्वीक्षते॥३०॥ भक्तिमेतां परां संज्ञां प्राहुः सांख्यविचक्षणाः॥ इममर्थं च गीतायां कृष्णमाह हार्जुनं प्रति
॥३१॥ ब्रह्मभूतः प्रसन्नात्मा न शोचति न कांक्षति॥ समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम्॥३२॥ भक्त्यानये
वपरया गुणातीतावस्थितिर्भवेत्॥ शांतिश्च सर्व्वं या पुंसस्तस्मादेतां श्रयेत्सुधीः॥३३॥ सांख्यशास्त्रमागूढा॰ ॥१४६॥

र्थ्यं एव ब्रह्मायदर्शितः॥ यथाऽस्मै त्वेव महात्मा सिद्धांतं प्राहुरन्यथा॥२४॥ अभेदमाहुर्जीवस्य ते पर ब्रह्मण
श्चवै॥ चाक्रदेवाः स्वयं भूत्वा यथेष्टं कुर्वते क्रियाः॥२५॥ एकमेवेत्यादि श्रुतेस्तात्पर्यमनवाप्य च॥ प्रमाणत्वे
नतां प्राहुः स्वमते लोकवंचकाः॥२६॥ तन्मतं नग्रहीतव्यं संसृते मुक्तिमिच्छता॥ मे अद्वैतसिद्धांतस्ते
नत्वेषमपोदितः॥२७॥ नैवोस्ति वास्तवो नूनं जीवेशाब्रह्मणां हरेः॥ नित्यानां नित्य इत्यादि श्रुतिभिः प्रतिपादि
तः॥२८॥ ब्रह्मवित्परमाप्नोतीत्येषाप्युक्तिरपि स्फुटम्॥ उपास्यं हि परं ब्रह्म वदंति ब्रह्मवेदिनाम्॥२९॥ आत्मा
शरीरं यस्यास्ति नैवात्मा वेत्ति यं तथा॥ यश्चांतरो यमयति स ह्यात्मान्यमृतः प्रभुः॥३०॥ शरीरमक्षरं यस्यं नै
व यं वेत्ति चाक्षरम्॥३१॥ योंतरो योऽयमयति ह्यक्षरं सोऽमृतः प्रभुः॥३१॥ इत्याद्यर्थाः श्रुतिगणास्तस्य परब्र
ह्मणोऽपि च॥ परब्रह्मशरीरत्वं प्राहुर्न्तेन तु तदकृताम्॥३२॥ स्वरूपमक्षरस्यास्य श्रीमद्भागवते स्फुटं॥ मैत्रेयो
विदुरं प्रोचे वासस्यानंतयाहरेः॥३३॥ विकारैः सहितो युक्तैर्विशेषादिभिरावृतः॥ आंडकोशो बहिरयं प
चाशत्कोटिविस्तृतः॥३४॥ दशोत्तराधिकैर्यत्र प्रविष्टः परमाणुवत्॥ लक्ष्यतेंऽतर्गताश्चान्ये कोटिशो ह्यं
डराशयः॥३५॥ तदाहुरक्षरं ब्रह्म सर्व्वकारणकारणम्॥ विष्णोर्धाम परं साक्षात्पुरुषस्य महात्मनः॥३६॥
ज्ञस्य चेशेहशास्यापि नयस्त्रसरूपता॥ कुतस्त्वं रीतदेशास्यजीवस्य तु कुतस्तमाम्॥३७॥ एकत्वं यच्च वेदेक्ति

॥स॰जी॰ च॰ ॥ अस्तत्तोक्तं तु कीर्तितम् ॥ निर्विकल्पसमाधिस्थ दृष्टे वर्ण्यं तु वस्तुतः ॥३८॥ जीवात्मा जीवात्मवृत्तारूढा नराः प- ॥अ॰ ७३॥
॥२५७॥ श्यंतिभूतलम् ॥ एकं यथा नचाधःस्थान् सर्वान् पश्यति गानू तु मान् ॥३९॥ तथैव वर्तते महामुक्ता निर्विकल्प-
समाधयः ॥ अत्रैकमेव वीक्षंते ते नीवे ज्ञादीन् पश्यन्ति तु ॥४०॥ ये तु नैवं स्थिति प्राप्ता अत्रैकं शास्त्रमात्रतः ॥ तु-
च्छायथेत्याचरणं कुर्वंते ते पतंत्यधः ॥४१॥ अनेककोटिब्रह्मांडनियंतुः परमात्मनः ॥ अतो भेदोनमा वा-
नामिति जे योद्दिनिश्चयः ॥४२॥ जीवानामिश्वराणां च नकोपास्यः सएव हि ॥ श्रीवासुदेवो भगवान्नेकएवा-
स्तिनापरः ॥४३॥ अहसास्वरूपेण नतो भजेत्तं तेनात्मनैव गच्छमुने मुमुक्षुर्वै ॥ तेनैव यथा परमं समाधिंलब्धो
हरेर्धाम परात्परं च ॥४४॥ इति श्री सत्संगिजीवने नारायणचरित्रे धर्मशास्त्रे चतुर्थप्रकरणे ज्ञानोपदे-
शे सांख्यसिद्धांत निरूपणनामा ॥७३॥ श्रीनारायणमुनिरुवाच ॥ नकेर्दा देहे हरे-
र्यस्तस्य प्राणेंद्रियाणि तु ॥ पिंडीनवे शुद्धे हस्य काष्ठवक्त्रादि योगिनः ॥१॥ सन्नकिंचिवशी योगी महोध-
रेव नेंद्रियैः ॥ ग्रही तु स्वस्व विषयान्स्व न्को मानं दन निर्वृतः ॥२॥ प्रारब्धवशगो देहस्तस्य भ्रमति भूतले स ॥ ह-
रिमेव सर्वत्र पश्यति कृष्णिनो जगत् ॥३॥ प्रारब्धांते यथा देहं त्यक्त्वा स परमं पदम् ॥ प्राप्नोति कज येनैव प्रा-
ति तत्प्रोच्यतेऽधुना ॥४॥ अारो मकाशो रुद्ये ध्यान निष्ठेन योगिना ॥ ह्रपते तत्र स रंध्रां तं मूलाधारा दरवं- ॥२५७॥

स्थितः ॥५॥ ततो विद्युद्वत्त तेजो निर्गच्छद् हरिरीक्षते ॥ इंद्रियद्वारतो रोमच्छिद्रेभ्यः प्रसरत्स्वयम् ॥६॥ असं-
ख्यदीपिका युक्तान्निज्ञायो काच मंदिरात् ॥ यथा प्रभूतानि र्यांति तथैव तत्तेज आत्मनः ॥७॥ एकीभव-
ति तत्तेजः शाब्द स्तत्रो द्भवेत्तथा ॥ महाघंटाघटी यंत्र दुंदुभिध्वनि सन्निभाः ॥८॥ तच्छाद्वश्रवणेनास्य बाह्या-
भ्यंतर भावना ॥ नश्यत्येकी भवति च तेजो बाह्यांतरं ततः ॥९॥ जाग्रत्स्वप्नसुषुप्तीनां विलयो नाय तेनतत् ॥ सत्र-
काश्रात्तु रीयात्मा सोति लिंगं स्वमीक्षते ॥१०॥ तथा चतुर्विधाने हान्तु स्त्री लिंगादि विवर्जितान् ॥ सोति लिंगा-
नीक्षते ऽत्र ज्योतिष्येकतां गमत् ॥११॥ वर्धमानं च तत्तेजः शृष्टिआदि समं भवेत् ॥ पश्यति याप्य ब्रह्मांडं भि-
देदश्च तीरिति ॥१२॥ स्फुरेत्स्वशरीरे तु कालगत्या हरेस्तदा ॥ संवर्ताग्निवायव्यसविद्युत्तनधि-
त्वचः ॥१३॥ प्रकाशं तेन तो देहं विराजास हृज्जलिताम् ॥ प्राप्नुयसमि जानाति सत्तारूपः स योगवित् ॥१४॥ स तु-
रीयत्र काशोऽग्र्यदिव्यं नागवताभिधम् ॥ देहं स लब्ध्वा परमेश्वरान्मिमोदते ॥१५॥ न तस्य कर्मजन्मो ऽसौ
देहः किंत्वस्ती विम्मयः ॥ परजयेन यथा मेति न सर्गे च समजायते ॥१६॥ स तस्संकल्पापहतपाप्मत्वादिगुणान्वि-
तः ॥ समुक्तो वर्ततेतत्र सेवमानो हरिं मुदा ॥१७॥ इति ज्ञानं मुने तुभ्यमाख्यातं मोक्षसाधनम् ॥ सर्वोपनिष-
दां सारमारुण्याज्ञान नाशनम् ॥१८॥ इदं ज्ञानं प्रदातव्यं सज्जकाय मुमुक्षवे ॥ जितेंद्रियाय यशांताय पश्चनये

॥स.जी.च० स्वहितैषिणे ॥१९॥ अहिंसकाया शोहायनिकामायविशेषतः ॥ ग्राम्यसौख्येविरक्तायदेयमेतच्च सं अ०७४॥
॥२५८॥ हिये ॥२०॥ कामिने क्रोधिने चापि लोभिने निर्दयाय च ॥ एतत्क्वापि न दातव्यं न च देहाभिमानिने ॥२१॥
विष्णुभक्तिविहीनाय ग्राम्यसौख्यरताय च ॥ नैतद्देयं च हिंस्राय तथा मत्सरिणेऽपि च ॥२२॥ इदं च मृत्युपा
शायः पठेत्श्रद्धयातस्मादरात् ॥ सबुद्धिं प्राप्नुयात्सूनमात्मनि यत्करोतु मानव ॥२३॥ सुव्रत उवाच ॥ इत्युक्तमा
कर्ण्य मुनिः सराजन् ज्ञानं परं श्रीहरिणा गतिरूढः ॥ निःसंशयस्तं नजति स्म नित्यं ब्रह्मात्मना नारायणं तिवा
कदेवम् ॥२४॥ इति श्री सत्संगिजीवने नारायणचरित्रे धर्मशास्त्रे चतुर्थप्रकरणे ज्ञानोपदेशज्ञानफ
लनिरूपणनामा ॥१३॥ सुव्रत उवाच ॥ तस्मिन्महोत्सवे राजन्नैमहंसा भक्तसं
सदि ॥ स सिंहासनारूढः शास्त्री कृष्णेपि वावभौ ॥१॥ तत्रपर्वणि प्रहर्षा सधवा विधवाः स्त्रियः ॥ वीक्षमाणा
स्तमेवैकं निषेदुर्निखिला अपि ॥२॥ नानुवाच हरिभक्तान्संज्ञायः कस्यचिद्धृदि ॥ कश्चिद्दिनवेनाहिंस्रु
तेतिनराधिप ॥३॥ संप्रेरणेनाथसतामवेंडानेदत्तदावर्णिवरः प्रणम्य ॥ बद्धाञ्जलिस्तत्पुरतो निषण्णः प्र
पच्छतैसर्ववीदं विनीतः ॥४॥ अखंडानंद उवाच ॥ भगवन्ब्रह्मविद्यायाः सम्यग्वेत्ताप्रवर्त्तकः ॥ एकस्त्वं
त्वमेवासि पत्रमुत्यं तिस्तरयः पञ्चद्यामस्तो महर्षीणामेतेषां प्रभुमीश्चितम् ॥ प्रष्टुमेकं हितं श्रुत्वा त्वं हितमो ॥२५८॥

तरं प्रभो ॥६॥ एकमेवाद्वितीयं वै ब्रह्मेति वदति श्रुतिः ॥ ब्रह्म खल्विदं सर्वमित्यपि श्रुतिशासनम् ॥७॥ एतन्म
तमुपाश्रित्य जीवेश्वरजगत्स्वपि ॥ मायामयात्मिथ्येति प्राहुः केचन पंडिताः ॥८॥ नित्यानां नित्यसत्साद्याः श्रु
तीराः केचन ॥ जीवेश्वराणां नित्यत्वं विदंतो द्वन्द्ववदंतिहि ॥९॥ एतयोर्मतयोः स्वामिन्निर्णयं वक्तुमर्हसि
उभे सत्ये मयवा तयोरेकमृतं मतम् ॥१०॥ सुव्रत उवाच ॥ इति श्रुत्वा वचस्तस्य सोवाच सज्जनगुरुः इर्षय
न्मधुरैर्वाक्यैः सदः संस्थान्नृपीश्वतम् ॥११॥ श्रीनारायणमुनिरुवाच ॥ मुनयः शृणुत त्वं चाखंडानंद महा
मते ॥ द्वैताद्वैतेवदंतीनां श्रुतीनामाशयं ब्रुवे ॥१२॥ ब्रह्मशब्दो मुख्यतया कृष्णएव प्रवर्त्तते ॥ भगवच्छब्दव
द्धि इन्निति ज्ञानी श्रिमिश्रितम् ॥१३॥ स्वरूपे तागुणैश्चापि निरवध्यतिशायिता ॥ तस्यैवास्तीति ब्रह्मसाख्या
मन्वर्थाश्रुतयो विदुः ॥१४॥ ततोऽत्र तु विज्ञेया नत्यानोपासनेन वै ॥ तच्चाधर्मात्मदात्मत्वाद्धस्य संसारत्व
भेदतः ॥१५॥ स्वरूपं च स्वभावश्च विभूतिश्च तथा गुणाः ॥ नित्याः संति हरेस्तेते स्वचत्यागं तुकामता ॥१६
॥ सत्यज्ञानमनंतं च यः सर्वज्ञश्च सर्ववित् ॥ इत्याद्याः श्रुतयोऽनन्तानाद्द्वंवर्णयंतिहि ॥१७॥ इदं ब्रह्मसाभि
धः कृष्णो जयेत्याः संति केचरे ॥ विज्ञाप्यपुं प्रकृत्यादिशिष्यते एक एव सः ॥१८॥ तमेकं चाद्वितीयं च वेद
तिश्रुतयो हि ज ॥ स्थितं दिव्ये ब्रह्मपुरे निर्गुणं चेश्वरेश्वरम् ॥१९॥ उपासनेन यस्तस्य धाम सत्याऽऽसीतिकं जय

म्॥ निर्विकल्पस्थितौ नित्यं योगी पश्यति केवलम्॥२०॥ ब्रह्मैव ब्रह्म विदिति श्रुतिर्वर्ण्यते सयोगिराट्॥ महा 
मुक्त इति प्रोक्तस्तत्त्वविद्भिर्द्विजोत्तम॥२१॥ स सर्वं खल्विदं ब्रह्म तत्त्वं जानाति पश्यति॥ आत्मस्थानेर रू
पं च संश्रुत्य ब्रह्मविन्तदा॥२२॥ विना ब्रह्मस्वरूपं स नो ईक्षते चान्यं न रे॥ न विश्वं न स्वरं नैव जीवान् किंचिदपी
क्षते॥२३॥ इदं कल्पितिं प्राय पश्यतुं तीव्र वैराग्य वेगिनम्॥ गुरुस्त्वेकमिति श्रुत्वा शिष्यं बोधयते विदम्॥२४
॥ एकं ब्रह्म सात्त्वविवर्णि त्वेवं श्रुतिर्निरूप्यते॥ नित्यानां नित्य इत्येवं यथोक्तं तच्च वच्मि वः॥२५॥ सिष्ट्रु शाणादि
जीवानां जयेत् प्राकृतिकेन या॥ आत्यंतिकेऽपि नैवास्ति स्वरूपस्य विना ज्ञानम्॥२६॥ जयेत्प्राकृतिके देहो विरा
ड्रूपात्म संस्थितौ॥ स्वस्वरूपविजापेनेहा वेव वर्णितसत्तम॥२७॥ अथात्यंतिकेन देहेन सत्त्वास्ते प्रकृतौ नदी॥
स्थूलसूक्ष्मौ न या देहौ नाविनामपि न पश्यतः॥२८॥ तिरोभवंति प्रकृतौ ते कारणशरीरिणः॥ प्रधाने संज्ञा
वर्णिद्रसा तु प्रकृतिरुच्यते॥२९॥ तिरोभवति सा मूलप्रतौ च सपूरुषा॥ न तु स्वरूपतो नाशो तौ तेषां भवति
कर्हिचित्॥३०॥ आत्यंतिके च प्रलये प्रकृतिः सापि पुरुषे॥ तिरोभवति सूर्यस्य प्रकाशे रजनी यथा॥३१॥ स
महानन्दरूपः साक्षान्महत्सामायतया॥ ज्ञोऽतेः स्वरस्य प्रकाशेन देकरूपस्तु एव हि॥३२॥ न प्रकारणं देहाये
मुक्ता ध्यानबलेन तु॥ रूपस्य दिव्य देहेस्ति ब्रह्मरूपे वामते स्वरे॥३३॥ जयद्धये पि नै तेषां स्वरूपेण विना 

ज्ञानम्॥ भवतीति श्रुतिः सर्वान्निलानाहं महामुने॥३४॥ उत्पत्तिकाले सर्वेऽपि पुंप्रकृत्यादयः पुनः॥ आ
विर्भवंत्सम्ये विप्र यथापूर्वं तदिच्छया॥३५॥ अत्राकृतशरीरा ये मुक्तास्ते तु निजेच्छया॥ आविर्भवंति त्य
यथाले नावतरतां सह॥३६॥ नित्याने ता श्रुतिप्रोक्ता मुक्तावि दंतिहि॥ कल्योपास्ती बलेनापि वीक्ष्यं
ते स्वयमानयम्॥३७॥ योगिनस्ते तु संपन्नान् कि ज्ञानविरक्तिभिः॥ समाधि सविकल्पं हि प्राप्तास्य वगम्य
तास्य॥३८॥ मेरौ स्थिता यथा तस्मादवराम्य वैतान्नराः॥ वीक्षंते च दृश्यान् सर्वांस्तदाधारं च भूतलम्॥३९॥
सविकल्प समाधिस्थास्तानि मुक्तास्त येश्वरम्॥ मायां जीवांश्च वीक्षंते ब्रह्म चेति पृथक् पृथक्॥४०॥ लोका
लोकाच लब्धा स्वयं यथा वा पुरुषा द्विज॥ पदपंले कंतजं नो सर्वान् पि नगानद्रुमान्॥४१॥ तथैव ते महामु
क्ता निर्विकल्प समाधयः॥ ब्रह्मैकमेव वीक्षंते नेनीवेशा रीन्न तु पृथक्॥४२॥ कल्योपास्ति बलस्यायतारत
म्यवशाद्भो॥ त्रिविधा तु विकल्प्यंते निर्विकल्प समाधयः॥४३॥ कपुत्ताविद्दनीवस्य बुद्धीन्द्रियमनोजया
त॥ कस्वंचोपशमो यारम्भ तं ते वर्णितसत्तम॥४४॥ साक्षात्कल्पेयस्य पुंसो बुद्धीन्द्रियमनोजयात॥ तारकस्क
स्वंचोपशमो जाग्रति ज्ञास्य आदिमः॥४५॥ सुषुप्तौ प्रज्ञयां ब्रह्मांडस्याभिमानीनः॥ जयात्त्रिलोकावीईशस्य
सुखं पारकज्ञान ता॥४६॥ साक्षात्कल्पेयस्य पुंसो बुद्धीन्द्रियमनोजयात॥ तारकस्कंधं चोपशमो जाग्रति

स्यात्क्रमध्यमः ॥४७॥ विराट्तत्कारणैः साकं प्रधानस्य जगाद्यया ॥ प्रकृतौ प्राकृतजये एवं पुंसस्त्वलीन
ता ॥४८॥ साक्षात्कृष्णं यस्य पुंसो बुद्धीद्रियमनोजयात् ॥ तथा एवं चोपशमो जाग्रति स्यात्क्रमश्चांतिमः ॥४९॥
कृष्णसंबंधिसौख्यं यत्सर्वसौख्याधिकं हि तत् ॥ दृष्टांतमात्रमेतत्तु सुषुप्त्यादिसमीरितम् ॥५०॥ दृश्यं हि ते
महामुक्ता भवंति त्रिविधा हि ये ॥ तत्र शेतरः तस्थुस्थाः कथ्यंते स्थितिर्वेदविद्भिः ॥५१॥ निर्विकल्पस्थितिवशाद्दु
न्मता ब्रह्मरूपश्च यः ॥ नीवेशान्कल्पितान्प्राकृ शिति जानीहि निश्चितम् ॥५२॥ एकत्वमेव वर्णोऽपृथक्त्वं चा
वगम्यताम् ॥ श्रुतिशामाणता विद्धि सत्त्वमेव तदृयम् ॥५३॥ यत्तु नैवं स्थितिशामासा ब्रह्मैकंशास्त्रमात्रतः
बुध्वा यथेष्टाचरणं कुर्वते ते पतंत्यधः ॥५४॥ तादृशात्मकृतं पापं स्वशिष्याणां च पातकम् ॥ आत्मनेनादं प्र
कुर्वतो वोभुक्ते यमालये ॥५५॥ ब्रह्मशब्दद्वयं यत्र प्रोक्तं स्यात्तत्र तु द्विज ॥ आद्यं तु भगवद्धाम परात्परं च बृ
हदक्षरम् ॥५६॥ द्वितीयं तु स्वयं कृष्णः सर्वकारणकारणम् ॥ अक्षरात्परतः सुक्तो दिव्याकृतिश्च बुध्यताम्
५७ ॥ भेदो हि वास्तवो नित्यं जीवेशब्रह्मणां हरेः ॥ त्रिसानां नित्यत्वादि श्रुतिभिः प्रतिपादिताः ॥५८॥ ब्रह्मविसर
मा श्रोतीसेया श्रुतिरपि स्फुटम् ॥ प्राह ब्रह्मविदाप्नोति परं ब्रह्मेति सन्मते ॥५९॥ आत्मा शरीरं यस्यास्ति नैवा
त्मावेत्ति यं तथा ॥ यश्चांतरो यमयति त्वात्मानममृतः प्रभुः ॥६०॥ शरीरमक्षरं यस्य नैव यं वेत्ति चाक्षरम् ॥



यश्चांतरो यो यमयति त्वाक्षरं सोऽमृतः प्रभुः ॥६१॥ इत्याद्या बह्व्यः श्रुतिगणास्त्वक्षरब्रह्मणोऽपि च ॥ प्रा
कृष्णस्य शरीरत्वं तद्भिन्नत्वं तथा स्फुटम् ॥६२॥ अक्षरस्यापि चेन्नास्ति ब्रह्मणः कृष्णरूपता ॥ कृतस्त
र्हि तदैशस्य जीवस्य तु कृतत्त्वमाम् ॥६३॥ ततोऽभिः संशयो नत्वा मुमुक्षुः सर्वथा हरिम् ॥ योऽनन्तेत स
मुक्तः स्यादितरः संसृतिं व्रजेत ॥६४॥ श्रीमद्रामानुजाचार्यैरयमर्थः सविस्तरम् ॥ वर्णितोऽस्ति
महाभाष्ये संक्षेपात्समयोदितः ॥६५॥ सुव्रत उवाच ॥ इत्युक्तं श्रुतिसिद्धांतं हरिणा स नराधिप ॥ व
र्णिनश्च साधवः श्रुत्वा तं नेमुर्नृपश्रेष्ठ पाः ॥६६॥ स्वस्वस्थानं ततो गंतुं तानाज्ञाप्य द्विजान्निजान् ॥ प्रभुः
स्वयं निजावासमाजगाम दयानिधिः ॥६७॥ इत्थं हरिस्तत्र सवाग्विलासैरामानंदयन्नवहमेव भक्ता
न् ॥ हेमंतमस्मिन्स्वमनोरथं च संपूरयन्भक्तगणे रुवास ॥६८॥ इति श्रीसत्संगिजीवने नारायण
चरित्रे धर्मशास्त्रे चतुर्थप्रकरणे पंचाजगामिनीवब्रह्मणे दानेदप्रतिपादकश्रुत्यर्थनिर्णयनामा च
तुःसप्ततितमोऽध्यायः ॥ ७४ ॥